निब्बत्तनककायिकचेतसिकदुक्खाय उप्पज्जतीति सम्बन्धो। **देवमनुस्सानन्**ति इदं ''बहुनो जनस्सा''ति वुत्तेसु उक्कट्ठपुग्गलनिद्देसो। अपरो नयो – **बहुजनाहितायाति** बहुजनस्स महतो सत्तकायस्स अहितत्थाय, दिट्ठधम्मिकसम्परायिकअनत्थायाति अत्थो। **असुखाया**ति दिट्ठधम्मिकसम्परायिकअसुखत्थाय, दुविधदुक्खत्थायाति अत्थो। **अनत्थाया**ति परमत्थपटिक्खेपाय। निब्बानञ्हि परमत्थो, ततो उत्तरिं अत्थो नत्थि। **अहिताया**ति मग्गपटिक्खेपाय। निब्बानसम्पापकमग्गतो हि उत्तरिं हितं नाम नत्थि। **दुक्खाया**ति अरियसुखविराधनेन वट्टदुक्खताय। ये हि अरियसुखतो विरद्धा तं अधिगन्तुं अभब्बा, ते वट्टदुक्खे परिब्भमन्ति, अरियसुखतो च उत्तरिं सुखं नाम नत्थि। वुत्तञ्हेतं ''अयं समाधि पच्चुप्पन्नसुखो चेव आयतिञ्च सुखविपाको''ति (दी॰ नि॰ ३.३५५; अ॰ नि॰ ५.२७)।

इदानि ''सङ्घभेदो''ति सरूपतो दस्सेत्वा तस्स अहितादीनं एकन्तहेतुभावं पकासेतुं **''सङ्घे खो पन, भिक्खवे, भिन्ने''**तिआदिमाह। तत्थ **भिन्ने**ति निमित्तत्थे भुम्मं यथा ''अधनानं धने अननुप्पदीयमाने''ति (दी॰ नि॰ ३.९१), भेदहेतूति अत्थो। **अञ्ञमञ्ञं भण्डनानी**ति चतुन्नं परिसानं तप्पक्खिकानञ्च ''एसो धम्मो, नेसो धम्मो''ति अञ्ञमञ्ञं विवदनानि। भण्डनञ्हि कलहस्स पुब्बभागो। **परिभासा**ति ''इदञ्चिदञ्च वो अनत्थं करिस्सामा''ति भयुप्पादनवसेन तज्जना। **परिक्खेपा**ति जातिआदिवसेन परितो खेपा, दसहि अक्कोसवत्थूहि खुंसनवम्भना। **परिच्चजना**ति उक्खेपनियकम्मकरणादिवसेन निस्सारणा। **तत्था**ति तस्मिं सङ्घभेदे, तन्निमित्ते वा भण्डनादिके। **अप्पसन्ना**ति रतनत्तयगुणानं अनभिञ्ञा। **न पसीदन्ती**ति ''धम्मचारिनो समचारिनो''तिआदिना ञायं भिक्खूसु पसादनाकारो, तथा न पसीदन्ति, तेसं वा सोतब्बं सद्धातब्बं न मञ्ञन्ति। तथा च धम्मे सत्थरि च अप्पसन्नाव होन्ति। **एकच्चानं अञ्ञथत्तन्**ति पुथुज्जनानं अविरुळ्हसद्धानं पसादञ्ञथत्तं।

गाथायं **आपायिको**तिआदीसु अपाये निब्बत्तनारहताय आपायिको। तत्थपि अवीचिसङ्खाते महानिरये उप्पज्जतीति **नेरयिको**। एकं अन्तरकप्पं परिपुण्णमेव कत्वा तत्थ तिट्ठतीति **कप्पट्ठो**। सङ्घभेदसङ्खाते वग्गे रतोति **वग्गरतो**। अधम्मियताय **अधम्मो**। भेदकरवत्थूहि सङ्घभेदसङ्खाते एव च अधम्मे ठितोति **अधम्मट्ठो। योगक्खेमा पधंसती**ति योगक्खेमतो हिततो पधंसति परिहायति, चतूहि वा योगेहि अनुपद्दुतत्ता योगक्खेमं नाम अरहत्तं निब्बानञ्च, ततो पनस्स धंसने वत्तब्बमेव नत्थि। दिट्ठिसीलसामञ्ञतो संहतट्ठेन **सङ्घं**, ततो एव एककम्मादिविधानयोगेन **समग्गं** सहितं। **भेत्वाना**ति पुब्बे वुत्तलक्खणेन सङ्घभेदेन भिन्दित्वा। **कप्पन्**ति आयुकप्पं। सो पनेत्थ अन्तरकप्पोव। **निरयम्ही**ति अवीचिमहानिरयम्हि।

अट्ठमसुत्तवण्णना निट्ठिता।

९. सङ्घसामग्गीसुत्तवण्णना

१९. नवमे **एकधम्मो**ति एको कुसलधम्मो अनवज्जधम्मो। ''अयं धम्मो, नायं धम्मो''तिआदिना सचे सङ्घे विवादो उप्पज्जेय्य, तत्थ धम्मकामेन विञ्ञुना इति पटिसञ्चिक्खितब्बं ''ठानं खो, पनेतं विज्जति, यदिदं विवादो वड्ढमानो सङ्घराजिया वा सङ्घभेदाय वा संवत्तेय्या''ति। सचे तं अधिकरणं अत्तना पग्गहेत्वा ठितो, अग्गिं अक्कन्तेन विय सहसा ततो ओरमितब्बं। अथ परेहि तं पग्गहितं सयञ्चेतं सक्कोति वूपसमेतुं, उस्साहजातो हुत्वा दूरम्पि गन्त्वा तथा पटिपज्जितब्बं, यथा तं वूपसम्मति। सचे पन सयं न सक्कोति, सो च विवादो उपरूपरि वड्ढतेव, न वूपसम्मति। ये तत्थ पतिरूपा सिक्खाकामा सब्रह्मचारिनो, ते उस्साहेत्वा येन धम्मेन येन विनयेन येन सत्थुसासनेन तं अधिकरणं यथा वूपसम्मति, तथा वूपसमेतब्बं। एवं वूपसमेन्तस्स यो सङ्घसामग्गिकरो कुसलो धम्मो, अयमेत्थ एकधम्मोति अधिप्पेतो। सो

हि उभतोपक्खियानं द्वेळ्हकजातानं भिक्खूनं, तेसं अनुवत्तनवसेन ठितानं भिक्खुनीनं उपासकानं उपासिकानं तेसं आरक्खदेवतानं यावदेव ब्रह्मानम्पि उप्पज्जनारहं अहितं दुक्खावहं संकिलेसधम्मं अपनेत्वा महतो पुञ्ञरासिस्स कुसलाभिसन्दस्स हेतुभावतो सदेवकस्स लोकस्स हितसुखावहो होति। तेन वुत्तं **''एकधम्मो, भिक्खवे, लोके उप्पज्जमानो उप्पज्जति बहुजनहिताया''**तिआदि। तस्सत्थो अनन्तरसुत्ते वुत्तविपरियायेन वेदितब्बो। **सङ्घसामग्गी**ति सङ्घस्स समग्गभावो भेदाभावो एककम्मता एकुद्देसता च।

गाथायं **सुखा सङ्घस्स सामग्गी**ति सुखस्स पच्चयभावतो सामग्गी सुखाति वुत्ता। यथा ''सुखो बुद्धानमुप्पादो''ति (ध० प० १९४)। **समग्गानञ्चनुग्गहो**ति समग्गानं सामग्गिअनुमोदनेन अनुग्गण्हनं सामग्गिअनुरूपं, यथा ते सामग्गिं न विजहन्ति, तथा गहणं ठपनं अनुबलप्पदानन्ति अत्थो। **सङ्घं समग्गं कत्वाना**ति भिन्नं सङ्घं राजिपत्तं वा समग्गं सहितं कत्वा। **कप्प**न्ति आयुकप्पमेव। **सग्गम्हि मोदती**ति कामावचरदेवलोके अञ्ञे देवे दसहि ठानेहि अभिभवित्वा दिब्बसुखं अनुभवन्तो इच्छितनिप्फत्तियाव मोदति पमोदति ललति कीळतीति।

नवमसुत्तवण्णना निट्ठिता।

१०. पदुट्ठचित्तसुत्तवण्णना

२०. दसमस्स का उप्पत्ति? अट्ठुप्पत्तियेव। एकदिवसं किर भिक्खू धम्मसभायं सन्निसिन्ना कथं समुट्ठापेसुं – ''आवुसो, इधेकच्चो बहुं पुञ्ञकम्मं करोति, एकच्चो बहुं पापकम्मं, एकच्चो उभयवोमिस्सकं करोति। तत्थ वोमिस्सकारिनो कीदिसो अभिसम्परायो''ति? अथ सत्था धम्मसभं उपगन्त्वा पञ्ञत्तवरबुद्धासने निसिन्नो तं कथं सुत्वा ''भिक्खवे, मरणासन्नकाले संकिलिट्ठचित्तस्स दुग्गति पाटिकङ्खा''ति दस्सेन्तो इमाय अट्ठुप्पत्तिया इदं सुत्तं देसेसि।

तत्थ **इधा**ति देसापदेसे निपातो। स्वायं कत्थचि पदेसं उपादाय वुच्चति ''इधेव तिट्ठमानस्स, देवभूतस्स मे सतो''तिआदीसु (दी० नि० २.३६९)। कत्थचि सासनं उपादाय ''इधेव, भिक्खवे, समणो इध दुतियो समणो''तिआदीसु (म० नि० १.१३९; अ० नि० ४.२४१)। कत्थचि पदपूरणमत्ते ''इधाहं, भिक्खवे, भुत्तावी अस्सं पवारितो''तिआदीसु (म० नि० १.३०)। कत्थचि लोकं उपादाय वुच्चति ''इध तथागतो लोके उप्पज्जती''तिआदीसु (अ० नि० ३.६१)। इधापि लोके एव दट्ठब्बो। **एकच्च**न्ति एकं, अञ्ञतरन्ति अत्थो। **पुग्गल**न्ति सत्तं। सो हि यथापच्चयं कुसलाकुसलानं तब्बिपाकानञ्च पूरणतो मरणवसेन गलनतो च पुग्गलोति वुच्चति। **पदुट्ठचित्त**न्ति पदोसेन आघातेन दुट्ठचित्तं। अथ वा **पदुट्ठचित्त**न्ति दोसेन रागादिना पदूसितचित्तं। एत्थ च **एकच्च**न्ति इदं पदुट्ठचित्तस्स पुग्गलस्स विसेसनं। यस्स हि पटिसन्धिदायककम्मं ओकासमकासि, सो तथा वुत्तो। यस्स च अकुसलप्पवत्तितो चित्तं निवत्तेत्वा कुसलवसेन ओतारेतुं न सक्का, एवं आसन्नमरणो। **एव**न्ति इदानि वत्तब्बाकारं दस्सेति। **चेतसा**ति अत्तनो चित्तेन चेतोपरियञाणेन। **चेतो**ति तस्स पुग्गलस्स चित्तं। **परिच्चा**ति परिच्छिन्दित्वा **पजानामि**। ननु च यथाकम्मुपगञाणस्सायं विसयोति? सच्चमेतं, तदा पवत्तमानअकुसलचित्तवसेन पनेतं वुत्तं।

इमम्हि चायं समयेति इमस्मिं काले, इमायं वा पच्चयसामग्गियं, अयं पुग्गलो जवनवीथिया अपरभागे कालं करेय्य चेति अत्थो। न हि जवनक्खणे कालंकिरिया अत्थि। **यथाभतं निक्खित्तो एवं निरये**ति यथा आभतं किञ्चि आहरित्वा ठपितं, एवं अत्तनो कम्मुना निक्खित्तो निरये ठपितो एवाति अत्थो। **कायस्स भेदा**ति उपादिन्नक्खन्धपरिच्चागा। **परं मरणा**ति तदनन्तरं अभिनिब्बत्तक्खन्धग्गहणे। अथ वा **कायस्स भेदा**ति जीवितिन्द्रियस्स उपच्छेदा। **परं मरणा**ति चुतितो

उद्धं।

अपायन्तिआदि सब्बं निरयस्सेव वेवचनं। निरयो हि अयसङ्खाता सुखा अपेतोति **अपायो;** सग्गमोक्खहेतुभूता वा पुञ्ञसम्मता अया अपेतोतिपि अपायो। दुक्खस्स गति पटिसरणन्ति **दुग्गति;** दोसबहुलत्ता वा दुट्ठेन कम्मुना निब्बत्ता गतीतिपि दुग्गति। विवसा निपतन्ति एत्थ दुक्कटकम्मकारिनो, विनस्सन्ता वा एत्थ निपतन्ति सम्भिज्जमानङ्गपच्चङ्गाति **विनिपातो**। नत्थि एत्थ अस्सादसञ्ञितो अयोति निरस्सादट्ठेन **निरयो**। अथ वा अपायग्गहणेन तिरच्छानयोनि वुच्चति। तिरच्छानयोनि हि अपायो सुगतितो अपेतत्ता, न दुग्गति महेसक्खानं नागराजादीनं सम्भवतो। दुग्गतिग्गहणेन पेत्तिविसयो। सो हि अपायो चेव दुग्गति च सुगतितो अपेतत्ता दुक्खस्स च गतिभूतत्ता, न विनिपातो असुरसदिसं अविनिपातत्ता। विनिपातग्गहणेन असुरकायो। सो हि यथावुत्तेन अत्थेन अपायो चेव दुग्गति च, सब्बसम्पत्तिसमुस्सयेहि विनिपतितत्ता विनिपातोति च वुच्चति। निरयग्गहणेन अवीचिआदिअनेकप्पकारो निरयोव वुच्चति। इध पन सब्बपदेहिपि निरयोव वुत्तो। **उपपज्जन्ती**ति पटिसन्धिं गण्हन्ति।

गाथासु पठमगाथा सङ्गीतिकाले धम्मसङ्गाहकत्थेरेहि ठपिता। **ञत्वाना**ति पुब्बकालकिरिया। ञाणपुब्बकञ्हि ब्याकरणं। हेतुअत्थो वा त्वा-सद्दो यथा ''सीहं दिस्वा भयं होती''ति, जाननहेतूति अत्थो। **बुद्धो, भिक्खूनं सन्तिके**ति बुद्धो भगवा अत्तनो सन्तिके भिक्खूनं एतं परतो द्वीहि गाथाहि वुच्चमानं अत्थं ब्याकासि। सेसं वुत्तनयमेव।

दसमसुत्तवण्णना निट्ठिता।

दुतियवग्गवण्णना निट्ठिता।

३. ततियवग्गो

१. पसन्नचित्तसुत्तवण्णना

२१. ततियवग्गस्स पठमे **पसन्नचित्तन्**ति रतनत्तयसद्धाय कम्मफलसद्धाय च पसन्नमानसं। **सुगतिन्**ति सुन्दरं गतिं, सुखस्स वा गतिन्ति सुगतिं। **सग्गन्**ति रूपादिसम्पत्तीहि सुट्ठु अग्गन्ति **सग्गं। लोकन्**ति लोकियन्ति एत्थ पुञ्ञपापफलानि, लुज्जनट्ठेनेव वा लोकं। एत्थ च सुगतिग्गहणेन मनुस्सगतिपि सङ्गय्हति, सग्गग्गहणेन देवगति एव। सेसं हेट्ठा वुत्तनयमेव।

पठमसुत्तवण्णना निट्ठिता।

२. मेत्तसुत्तवण्णना

२२. दुतिये **मा, भिक्खवे, पुञ्ञानन्**ति एत्थ **मा**ति पटिसेधे निपातो। **पुञ्ञ**सद्दो ''कुसलानं, भिक्खवे, धम्मानं समादानहेतु एवमिदं पुञ्ञं पवड्ढती''तिआदीसु (दी॰ नि॰ ३.३८०) पुञ्ञफले आगतो। ''अविज्जागतोयं, भिक्खवे, पुरिसपुग्गलो पुञ्ञञ्चे सङ्खारं अभिसङ्खरोती''तिआदीसु (सं॰ नि॰ २.५१) कामरूपावचरसुचरिते। ''पुञ्ञूपगं भवति विञ्ञाण''न्तिआदीसु सुगतिविसेसभूते उपपत्तिभवे। ''तीणिमानि, भिक्खवे, पुञ्ञकिरियवत्थूनि – दानमयं पुञ्ञकिरियवत्थु, सीलमयं पुञ्ञकिरियवत्थु, भावनामयं पुञ्ञकिरियवत्थू''तिआदीसु (इतिवु॰ ६०; अ॰ नि॰ ८.३६) कुसलचेतनायं। इध पन तेभूमककुसलधम्मे वेदितब्बो। **भायित्था**ति एत्थ दुविधं भयं ञाणभयं, सारज्जभयन्ति। तत्थ

''येपि ते, भिक्खवे, देवा दीघायुका वण्णवन्तो सुखबहुला उच्चेसु विमानेसु चिरट्ठितिका, तेपि तथागतस्स धम्मदेसनं सुत्वा येभुय्येन भयं संवेगं सन्तासं आपज्जन्ती''तिआदीसु (अ॰ नि॰ ४.३३) आगतं ञाणभयं। ''अहुदेव भयं, अहु छम्भितत्तं, अहु लोमहंसो''तिआदीसु (दी॰ नि॰ २.३१८) आगतं सारज्जभयं। इधापि सारज्जभयमेव। अयञ्हेत्थ अत्थो – भिक्खवे, दीघरत्तं कायवचीसंयमो वत्तपटिवत्तपूरणं एकासनं, एकसेय्यं, इन्द्रियदमो, धुतधम्मेहि चित्तस्स निग्गहो, सतिसम्पजञ्ञं, कम्मट्ठानानुयोगवसेन वीरियारम्भोति एवमादीनि यानि भिक्खुना, निरन्तरं पवत्तेतब्बानि पुञ्ञानि, तेहि मा भायित्थ, मा भयं सन्तासं आपज्जित्थ, एकच्चस्स दिट्ठधम्मसुखस्स उपरोधभयेन सम्परायिकनिब्बानसुखदायकेहि पुञ्ञेहि मा भायित्थाति। निस्सक्के हि इदं सामिवचनं।

इदानि ततो अभायितब्बभावे कारणं दस्सेन्तो **''सुखस्सेत''**न्तिआदिमाह। तत्थ **सुख**सद्दो ''सुखो बुद्धानं उप्पादो, सुखा विरागता लोके''तिआदीसु (ध॰ प॰ १९४) सुखमूले आगतो। ''यस्मा च खो, महालि, रूपं सुखं सुखानुपतितं सुखावक्कन्त''न्तिआदीसु (सं॰ नि॰ ३.६०) सुखारम्मणे। ''यावञ्चिदं, भिक्खवे, न सुकरं अक्खानेन पापुणितुं याव सुखा सग्गा''तिआदीसु (म॰ नि॰ ३.२५५) सुखपच्चयट्ठाने। ''सुखो पुञ्ञस्स उच्चयो''तिआदीसु (ध॰ प॰ ११८) सुखहेतुम्हि। ''दिट्ठधम्मसुखविहारा एते धम्मा''तिआदीसु (म॰ नि॰ १.८२) अब्यापज्जे। ''निब्बानं परमं सुख''न्तिआदीसु (ध॰ प॰ २०४; म॰ नि॰ २.२१५) निब्बाने। ''सुखस्स च पहाना''तिआदीसु (चूळनि॰ खग्गविसाणसुत्तनिद्देस १२५) सुखवेदनायं। ''अदुक्खमसुखं सन्तं, सुखमिच्चेव भासित''न्तिआदीसु (सं॰ नि॰ ४.२५३; इतिवु॰ ५३) उपेक्खावेदनायं। ''द्वेपि मया, आनन्द, वेदना वुत्ता परियायेन सुखा वेदना, दुक्खा वेदना''तिआदीसु (म॰ नि॰ २.८९) इट्ठसुखे। ''सुखो विपाको पुञ्ञान''न्तिआदीसु (पेटको॰ २३) सुखविपाके। इधापि इट्ठविपाके एव दट्ठब्बो। **इट्ठस्सा**तिआदीसु एसितब्बतो अनिट्ठपटिक्खेपतो च इट्ठस्स, कमनीयतो मनस्मिञ्च कमनतो पविसनतो **कन्तस्स,** पियायितब्बतो सन्तप्पनतो च **पियस्स,** माननीयतो मनस्स पवड्ढनतो च **मनापस्सा**ति अत्थो वेदितब्बो। **यदिदं पुञ्ञानी**ति ''पुञ्ञानी''ति यदिदं वचनं, एतं सुखस्स इट्ठस्स विपाकस्स अधिवचनं नामं, सुखमेव तं यदिदं पुञ्ञन्ति फलेन कारणस्स अभेदूपचारं वदति। तेन कतूपचितानं पुञ्ञानं अवस्संभाविफलं सुत्वा अप्पमत्तेन सक्कच्चं पुञ्ञानि कातब्बानीति पुञ्ञकिरियायं नियोजेति, आदरञ्च नेसं तत्थ उप्पादेति।

इदानि अत्तना सुनेत्तकाले कतेन पुञ्ञकम्मेन दीघरत्तं पच्चनुभूतं भवन्तरपटिच्छन्नं उळारतमं पुञ्ञविपाकं उदाहरित्वा तमत्थं पाकटं करोन्तो **''अभिजानामि खो पनाह''**न्तिआदिमाह। तत्थ **अभिजानामी**ति अभिविसिट्ठेन ञाणेन जानामि, पच्चक्खतो बुज्झामि। **दीघरत्त**न्ति चिरकालं। **पुञ्ञान**न्ति दानादिकुसलधम्मानं। **सत्त वस्सानी**ति सत्त संवच्छरानि। **मेत्तचित्त**न्ति मिज्जतीति मेत्ता, सिनिय्हतीति अत्थो। मित्ते भवा, मित्तस्स वा एसा पवत्तीतिपि मेत्ता। लक्खणादितो पन हिताकारप्पवत्तिलक्खणा, हितूपसंहाररसा, आघातविनयपच्चुपट्ठाना, सत्तानं मनापभावदस्सनपदट्ठाना। ब्यापादूपसमो एतिस्सा सम्पत्ति, सिनेहासम्भवो विपत्ति। सा एतस्स अत्थीति मेत्तचित्तं। **भावेत्वा**ति मेत्तासहगतं चित्तं, चित्तसीसेन समाधि वुत्तोति मेत्तासमाधिं मेत्ताब्रह्मविहारं उप्पादेत्वा चेव वड्ढेत्वा च। **सत्त संवट्टविवट्टकप्पे**ति सत्त महाकप्पे। संवट्ट-विवट्टग्गहणेनेव हि संवट्टट्ठायि-विवट्टट्ठायिनोपि गहिता। **इमं लोक**न्ति कामलोकं। **संवट्टमाने सुद**न्ति संवट्टमाने। **सुद**न्ति निपातमत्तं विनस्समानेति अत्थो। ''संवत्तमाने सुद''न्ति च पठन्ति। **कप्पे**ति काले। कप्पसीसेन हि कालो वुत्तो। काले खीयमाने कप्पोपि खीयतेव। यथाह –

''कालो घसति भूतानि, सब्बानेव सहत्तना''ति॥ (जा॰ १.२.१९०)।

''आभस्सरूपगो होमी''ति वुत्तत्ता तेजोसंवट्टवसेनेत्थ कप्पवुट्ठानं वेदितब्बं। **आभस्सरूपगो**ति तत्थ पटिसन्धिग्गहणवसेन आभस्सरब्रह्मलोकं उपगच्छामीति आभस्सरूपगो होमि। **विवट्टमाने**ति सण्ठहमाने, जायमानेति अत्थो। **सुञ्ञं ब्रह्मविमानं उपपज्जामी**ति कस्सचि सत्तस्स तत्थ निब्बत्तस्स अभावतो सुञ्ञं, यं पठमज्झानभूमिसङ्खातं ब्रह्मविमानं आदितो निब्बत्तं, तं पटिसन्धिग्गहणवसेन उपपज्जामि उपेमि। **ब्रह्मा**ति कामावचरसत्तेहि सेट्ठट्ठेन तथा तथा ब्रूहितगुणताय ब्रह्मविहारतो निब्बत्तट्ठेन च ब्रह्मा। ब्रह्मपारिसज्जब्रह्मपुरोहितेहि महन्तो ब्रह्माति **महाब्रह्मा**। ततो एव ते अभिभवित्वा ठितत्ता **अभिभू**। तेहि केनचि गुणेन न अभिभूतोति **अनभिभूतो**। **अञ्ञदत्थू**ति एकंसवचने निपातो। **दसो**ति दस्सनसीलो, सो अतीतानागतपच्चुप्पन्नानं दस्सनसमत्थो, अभिञ्ञाणेन पस्सितब्बं पस्सामीति अत्थो। सेसब्रह्मानं इद्धिपादभावनाबलेन अत्तनो चित्तञ्च मम वसे वत्तेमीति **वसवत्ती** होमीति योजेतब्बं। तदा किर बोधिसत्तो अट्ठसमापत्तिलाभीपि समानो तथा सत्तहितं अत्तनो पारमिपरिपूरणञ्च ओलोकेन्तो तासु एव द्वीसु झानभूमीसु निकन्तिं उप्पादेत्वा मेत्ताब्रह्मविहारवसेन अपरापरं संसरि। तेन वुत्तं ''**सत्तवस्सानि...पे०... वसवत्ती**''ति।

एवं भगवा रूपावचरपुञ्ञस्स विपाकमहन्ततं पकासेत्वा इदानि कामावचरपुञ्ञस्सापि तं दस्सेन्तो ''**छत्तिंसक्खत्तु**''न्तिआदिमाह। तत्थ **सक्को अहोसि**न्ति छत्तिंस वारे अञ्ञत्थ अनुपपज्जित्वा निरन्तरं सक्को देवानमिन्दो तावतिंसदेवराजा अहोसि। **राजा अहोसि**न्तिआदीसु चतूहि अच्छरियधम्मेहि चतूहि च सङ्गहवत्थूहि लोकं रञ्जेतीति **राजा**। चक्करतनं वत्तेति, चतूहि सम्पत्तिचक्केहि वत्तति, तेहि च परं वत्तेति, परहिताय च इरियापथचक्कानं वत्तो एतस्मिं अत्थीति **चक्कवत्ती। राजा**ति चेत्थ सामञ्ञं, **चक्कवत्ती**ति विसेसं। धम्मेन चरतीति **धम्मिको**। ञायेन समेन वत्ततीति अत्थो। धम्मेनेव रज्जं लभित्वा राजा जातोति **धम्मराजा**। परहितधम्मचरणेन वा **धम्मिको**, अत्तहितधम्मचरणेन **धम्मराजा**, चतुरन्ताय इस्सरोति **चातुरन्तो,** चतुसमुद्दन्ताय चतुब्बिधदीपविभूसिताय च पथविया इस्सरोति अत्थो। अज्झत्तं कोपादिपच्चत्थिके, बहिद्धा च सब्बराजानो अदण्डेन असत्थेन विजेसीति **विजितावी**। जनपदे थावरभावं धुवभावं पत्तो, न सक्का केनचि ततो चालेतुं जनपदो वा तम्हि थावरियप्पत्तो अनुयुत्तो सकम्मनिरतो अचलो असम्पवेधीति **जनपदत्थावरियप्पत्तो**।

चक्करतनं, हत्थिरतनं, अस्सरतनं, मणिरतनं, इत्थिरतनं, गहपतिरतनं, परिणायकरतनन्ति इमेहि सत्तहि रतनेहि समुपेतोति **सत्तरतनसमन्नागतो**। तेसु हि राजा चक्कवत्ति चक्करतनेन अजितं जिनाति, हत्थिअस्सरतनेहि विजिते सुखेनेव अनुविचरति, परिणायकरतनेन विजितमनुरक्खति, सेसेहि उपभोगसुखमनुभवति। पठमेन चस्स उस्साहसत्तियोगो, पच्छिमेन मन्तसत्तियोगो, हत्थिअस्सगहपतिरतनेहि पभूसत्तियोगो सुपरिपुण्णो होति, इत्थिमणिरतनेहि तिविधसत्तियोगफलं। सो इत्थिमणिरतनेहि परिभोगसुखमनुभवति, सेसेहि उपभोगसुखं। विसेसतो चस्स पुरिमानि तीणि अदोसकुसलमूलजनितकम्मानुभावेन सम्पज्जन्ति, मज्झिमानि अलोभकुसलमूलजनितकम्मानुभावेन, पच्छिममेकं अमोहकुसलमूलजनितकम्मानुभावेनाति वेदितब्बं **पदेसरज्जस्सा**ति खुद्दकरज्जस्स।

एतदहोसीति अत्तनो सम्पत्तियो पच्चवेक्खन्तस्स पच्छिमे चक्कवत्तिकाले एतं ''किस्स नु खो मे इदं कम्मस्स फल''न्तिआदिकं अहोसि। सब्बत्थकमेव तस्मिं तस्मिम्पि भवे एतदहोसियेव। तत्थायं चक्कवत्तिकालवसेन योजना। **एवंमहिद्धिको**ति मणिरतनहत्थिरतनादिप्पमुखाय कोसवाहनसम्पत्तिया जनपदत्थावरियप्पत्तिया च एवंमहिद्धिको। **एवंमहानुभावो**ति चक्करतनादिसमन्नागमेन कस्सचिपि पीळं अकरोन्तोव सब्बराजूहि सिरसा सम्पटिच्छितसासनवेहासगमनादीहि एवं महानुभावो। **दानस्सा**ति अन्नादिदेय्यधम्मपरिच्चागस्स। **दमस्सा**ति चक्खादिइन्द्रियदमनस्स चेव समाधानवसेन रागादिकिलेसदमनस्स च। **संयमस्सा**ति कायवचीसंयमस्स। तत्थ यं

समाधानवसेन किलेसदमनं, तं भावनामयं पुञ्ञं, तञ्च खो मेत्ताब्रह्मविहारभूतं इधाधिप्पेतं। तस्मिञ्च उपचारप्पनाभेदेन दुविधे यं अप्पनाप्पत्तं, तेनस्स यथावुत्तासु द्वीसु झानभूमीसु उपपत्ति अहोसि। इतरेन तिविधेनापि यथारहं पत्तचक्कवत्तिआदिभावोति वेदितब्बं।

इति भगवा अत्तानं कायसक्खिं कत्वा पुञ्ञानं विपाकमहन्ततं पकासेत्वा इदानि तमेवत्थं गाथाबन्धेन दस्सेन्तो **''पुञ्ञमेवा''**तिआदिमाह। तत्थ **पुञ्ञमेव सो सिक्खेय्या**ति यो अत्थकामो कुलपुत्तो, सो पुञ्ञफलनिब्बत्तनतो, अत्तनो सन्तानं पुननतो च ''पुञ्ञ''न्ति लद्धनामं तिविधं कुसलमेव सिक्खेय्य निवेसेय्य उपचिनेय्य पसवेय्याति अत्थो। **आयतग्ग**न्ति विपुलफलताय उळारफलताय आयतग्गं, पियमनापफलताय वा आयतिं उत्तमन्ति आयतग्गं, आयेन वा योनिसोमनसिकारादिप्पच्चयेन उळारतमेन अग्गन्ति आयतग्गं। तकारो पदसन्धिकरो। अथ वा आयेन पुञ्ञफलेन अग्गं पधानन्ति आयतग्गं। ततो एव **सुखुद्रयं** सुखविपाकन्ति अत्थो।

कतमं पन तं पुञ्ञं, कथञ्च नं सिक्खेय्याति आह **''दानञ्च समचरियञ्च, मेत्तचित्तञ्च भावये''**ति। तत्थ **समचरिय**न्ति कायविसमादीनि वज्जेत्वा कायसमादिचरितं, सुविसुद्धं सीलन्ति अत्थो। **भावये**ति अत्तनो सन्ताने उप्पादेय्य वड्ढेय्य। **एते धम्मे**ति एते दानादिके सुचरितधम्मे। **सुखसमुद्दये**ति सुखानिसंसे, आनिसंसफलम्पि नेसं सुखमेवाति दस्सेति। **अब्यापज्जं सुखं लोक**न्ति कामच्छन्दादिब्यापादविरहितत्ता अब्यापज्जं निद्दुक्खं, परपीळाभावे पन वत्तब्बं नत्थि। झानसमापत्तिवसेन सुखबहुलत्ता सुखं, एकन्तसुखञ्च ब्रह्मलोकं झानपुञ्ञानं, इतरपुञ्ञानं पन तदञ्ञं सम्पत्तिभवसङ्खातं सुखं लोकं **पण्डितो** सप्पञ्ञो **उपपज्जति** उपेति। इति इमस्मिं सुत्ते गाथासु च वट्टसम्पत्ति एव कथिता।

दुतियसुत्तवण्णना निट्ठिता।

३. उभयत्थसुत्तवण्णना

२३. ततिये **भावितो**ति उप्पादितो च वड्ढितो च। **बहुलीकतो**ति पुनप्पुनं कतो। **अत्थो**ति हितं। तञ्हि अरणीयतो उपगन्तब्बतो अत्थोति वुच्चति। **समधिगय्ह तिट्ठती**ति सम्मा परिग्गहेत्वा अविजहित्वा वत्तति। **दिट्ठधम्मिक**न्ति दिट्ठधम्मो वुच्चति पच्चक्खभूतो अत्तभावो, दिट्ठधम्मे भवं दिट्ठधम्मिकं, इधलोकपरियापन्नन्ति अत्थो। **सम्परायिक**न्ति धम्मवसेन सम्परेतब्बतो सम्परायो, परलोको, सम्पराये भवं सम्परायिकं, परलोकपरियापन्नन्ति वुत्तं होति।

को पनेस दिट्ठधम्मिको नाम अत्थो, को वा सम्परायिकोति? सङ्खेपेन ताव यं इधलोकसुखं, यञ्चेतरहि इधलोकसुखावहं, अयं दिट्ठधम्मिको अत्थो। सेय्यथिदं — गहट्ठानं ताव इध यं किञ्चि वित्तूपकरणं, अनाकुलकम्मन्तता, आरोग्यसंविधानं, वत्थुविसदकिरियायोगविहितानि सिप्पायतनविज्जाट्ठानानि सङ्गहितपरिजनताति एवमादि। पब्बजितानं पन ये इमे जीवितपरिक्खारा चीवरपिण्डपातसेनासनगिलानप्पच्चयभेसज्जपरिक्खारा। तेसं अकिच्छलाभो, तत्थ च सङ्खाय पटिसेवना, सङ्खाय परिवज्जना, वत्थुविसदकिरिया, अप्पिच्छता, सन्तुट्ठि, पविवेको, असंसग्गोति एवमादि। पतिरूपदेसवाससप्पुरिसूपनिस्सयसद्धम्मस्सवनयोनिसोमनसिकारादयो पन उभयेसं साधारणा उभयानुरूपा चाति वेदितब्बा।

अप्पमादोति एत्थ अप्पमादो पमादप्पटिपक्खतो वेदितब्बो। को पनेस पमादो नाम? पमज्जनाकारो। वुत्तं हेतं —

''तत्थ कतमो पमादो? कायदुच्चरिते वा वचीदुच्चरिते वा मनोदुच्चरिते वा पञ्चसु वा कामगुणेसु चित्तस्स

> वोस्सग्गो वोस्सग्गानुप्पादनं कुसलानं वा धम्मानं भावनाय असक्कच्चकिरियता असातच्चकिरियता अनट्ठितकिरियता ओलीनवुत्तिता निक्खित्तछन्दता निक्खित्तधुरता अनासेवना अभावना अबहुलीकम्मं अनधिट्ठानं अननुयोगोपमादो। यो एवरूपो पमादो पमज्जना पमज्जितत्तं। अयं वुच्चति पमादो''ति (विभ॰ ८४६)।

तस्मा वुत्तप्पटिपक्खतो अप्पमादो वेदितब्बो। अत्थतो हि सो सतिया अविप्पवासो, निच्चं उपट्ठितस्सतिया एतं नामं। अपरे पन ''सतिसम्पजञ्ञयोगेन पवत्ता चत्तारो अरूपिनो खन्धा अप्पमादो''ति वदन्ति।

''भावितो बहूलीकतो''ति वुत्तं, कथं पनायं अप्पमादो भावेतब्बोति? न अप्पमादभावना नाम विसुं एकभावना अत्थि। या हि काचि पुञ्ञकिरिया कुसलकिरिया, सब्बा सा अप्पमादभावनात्वेव वेदितब्बा। विसेसतो पन विवट्टूपनिस्सयं सरणगमनं कायिकवाचसिकसंवरञ्च उपादाय सब्बा सीलभावना, सब्बा समाधिभावना, सब्बा पञ्ञाभावना, सब्बा कुसलभावना, अनवज्जभावना, अप्पमादभावनाति वेदितब्बा। ''अप्पमादो''ति हि इदं महन्तं अत्थं दीपेति, महन्तं अत्थं परिग्गहेत्वा तिट्ठति। सकलम्पि तेपिटकं बुद्धवचनं आहरित्वा अप्पमादपदस्स अत्थं कत्वा कथेन्तो धम्मकथिको ''अतित्थेन पक्खन्दो''ति न वत्तब्बो। कस्मा? अप्पमादपदस्स महन्तभावतो। तथा हि सम्मासम्बुद्धो कुसिनारायं यमकसालानमन्तरे परिनिब्बानसमये निपन्नो अभिसम्बोधितो पट्ठाय पञ्चचत्तालीसाय वस्सेसु अत्तना भासितं धम्मं एकेन पदेन सङ्गहेत्वा दस्सेन्तो – ''अप्पमादेन सम्पादेथा''ति भिक्खूनं ओवादमदासि। तथा च वुत्तं –

> ''सेय्यथापि, भिक्खवे, यानि कानिचि जङ्गलानं पाणानं पदजातानि, सब्बानि तानि हत्थिपदे समोधानं गच्छन्ति, हत्थिपदं तेसं अग्गमक्खायति यदिदं महन्तट्ठेन; एवमेव खो, भिक्खवे, ये केचि कुसला धम्मा, सब्बेते अप्पमादमूलका अप्पमादसमोसरणा, अप्पमादो तेसं धम्मानं अग्गमक्खायती''ति (म॰ नि॰ १.३००)।

गाथासु **अप्पमादं पसंसन्ती**ति दानादिपुञ्ञकिरियासु अप्पमादं अप्पमज्जनं पण्डिता सप्पञ्ञा बुद्धादयो पसंसन्ति, वण्णेन्ति थोमेन्ति। कस्मा? यस्मा **अप्पमत्तो उभो अत्थे अधिगण्हाति पण्डितो**। के पन ते उभो अत्थाति आह – ''दिट्ठे धम्मे च यो अत्थो, यो चत्थो सम्परायिको''ति, एवमेत्थ पदयोजना वेदितब्बा। इधापि **दिट्ठे धम्मे च यो अत्थो**ति गहट्ठस्स ताव ''अनवज्जानि कम्मानि, अनाकुला च कम्मन्ता''तिआदिना नयेन वुत्तो कसिगोरक्खादिविधिना लद्धब्बो अत्थो, पब्बजितस्स पन अविप्पटिसारादिअत्थो वेदितब्बो। **यो चत्थो सम्परायिको**ति पन उभयेसम्पि धम्मचरियाव वुत्ताति वेदितब्बा। **अत्थाभिसमया**ति दुविधस्सपि अत्थस्स हितस्स पटिलाभा, लद्धब्बेन समिति सङ्गति समोधानन्ति समयो, लाभो। समयो एव **अभिसमयो,** अभिमुखभावेन वा समयो अभिसमयोति एवमेत्थ अभिसमयो वेदितब्बो। धितिसम्पन्नत्ता **धीरो**। ततियेन चेत्थ अत्थ-सद्देन परमत्थस्स निब्बानस्सापि सङ्गहो वेदितब्बो। सेसं सुविञ्ञेय्यमेव। इति इमस्मिं सुत्ते वट्टसम्पत्ति एव कथिता। गाथायं पन विवट्टस्सपि सङ्गहो दट्ठब्बो। तथा हि वुत्तं –

''अप्पमादो अमतपदं, पमादो मच्चुनो पदं।
अप्पमत्ता न मीयन्ति, ये पमत्ता यथा मता॥

''एवं विसेसतो ञत्वा, अप्पमादम्हि पण्डिता।
अप्पमादे पमोदन्ति, अरियानं गोचरे रता॥

''ते झायिनो साततिका, निच्चं दळ्हपरक्कमा।

फुसन्ति धीरा निब्बानं, योगक्खेमं अनुत्तर''न्ति॥ (ध० प० २१-२३)।

तस्मा ''अत्थाभिसमया''ति एत्थ लोकुत्तरत्थवसेनपि अत्थो वेदितब्बो।

ततियसुत्तवण्णना निट्ठिता।

४. अट्ठिपुञ्जसुत्तवण्णना

२४. चतुत्थे **एकपुग्गलस्सा**ति एत्थ **पुग्गलो**ति अयं वोहारकथा। बुद्धस्स हि भगवतो दुविधा देसना सम्मुतिदेसना च परमत्थदेसना चाति। तत्थ ''पुग्गलो, सत्तो, इत्थी, पुरिसो, खत्तियो, ब्राह्मणो, देवो, मारो''ति एवरूपा **सम्मुतिदेसना**। ''अनिच्चं, दुक्खं, अनत्ता, खन्धा, धातु, आयतना, सतिपट्ठाना''ति एवरूपा **परमत्थदेसना**। तत्थ भगवा ये सम्मुतिवसेन देसनं सुत्वा विसेसमधिगन्तुं समत्था, नेसं सम्मुतिदेसनं देसेति। ये पन परमत्थवसेन देसनं सुत्वा विसेसमधिगन्तुं समत्था, तेसं परमत्थदेसनं देसेति।

तत्थायं उपमा – यथा हि देसभासाकुसलो तिण्णं वेदानं अत्थसंवण्णनको आचरियो ये दमिळभासाय वुत्ते अत्थं जानन्ति, तेसं दमिळभासाय आचिक्खति। ये अन्धकभासादीसु अञ्ञतराय, तेसं ताय ताय भासाय। एवं ते माणवका छेकं ब्यत्तं आचरियमागम्म खिप्पमेव सिप्पं उग्गण्हन्ति। तत्थ आचरियो विय बुद्धो भगवा, तयो वेदा विय कथेतब्बभावे ठितानि तीणि पिटकानि, देसभासाकोसल्लमिव सम्मुतिपरमत्थकोसल्लं, नानादेसभासा माणवका विय सम्मुतिपरमत्थवसेन पटिविज्झनसमत्था वेनेय्या, आचरियस्स दमिळभासादिआचिक्खनं विय भगवतो सम्मुतिपरमत्थवसेन देसना वेदितब्बा। आह चेत्थ –

''दुवे सच्चानि अक्खासि, सम्बुद्धो वदतं वरो।
सम्मुतिं परमत्थञ्च, ततियं नूपलब्भति॥

''सङ्केतवचनं सच्चं, लोकसम्मुतिकारणा।
परमत्थवचनं सच्चं, धम्मानं भूतकारणा॥

''तस्मा वोहारकुसलस्स, लोकनाथस्स सत्थुनो।
सम्मुतिं वोहरन्तस्स, मुसावादो न जायती''ति॥

अपिच अट्ठहि कारणेहि भगवा पुग्गलकथं कथेति – हिरोत्तप्पदीपनत्थं, कम्मस्सकतादीपनत्थं, पच्चत्तपुरिसकारदीपनत्थं,, आनन्तरियदीपनत्थं, ब्रह्मविहारदीपनत्थं, पुब्बेनिवासदीपनत्थं, दक्खिणाविसुद्धिदीपनत्थं, लोकसम्मुतिया अप्पहानत्थं, चाति। ''खन्धधातुआयतनानि हिरियन्ति ओत्तप्पन्ती''ति हि वुत्ते महाजनो न जानाति, सम्मोहं आपज्जति, पटिसत्तु वा होति – ''किमिदं खन्धधातुआयतनानि हिरियन्ति ओत्तप्पन्ति नामा''ति? ''इत्थी हिरियति ओत्तप्पति, पुरिसो, खत्तियो, ब्राह्मणो, देवो, मारो''ति पन वुत्ते जानाति, न सम्मोहं आपज्जति, न पटिसत्तु वा होति। तस्मा भगवा **हिरोत्तप्पदीपनत्थं** पुग्गलकथं कथेति।

''खन्धा कम्मस्सका, धातुयो आयतनानी''ति वुत्तेपि एसेव नयो। तस्मा **कम्मस्सकतादीपनत्थम्पि** पुग्गलकथं

कथेति।

''वेळुवनादयो महाविहारा खन्धेहि कारापिता, धातूहि आयतनेही''ति वुत्तेपि एसेव नयो। तथा ''खन्धा मातरं जीविता वोरोपेन्ति, पितरं, अरहन्तं, रुहिरुप्पादकम्मं, सङ्घभेदकम्मं करोन्ति, धातुयो आयतनानी''ति वुत्तेपि एसेव नयो। ''खन्धा मेत्तायन्ति, धातुयो आयतनानी''ति वुत्तेपि एसेव नयो। ''खन्धा पुब्बेनिवासं अनुस्सरन्ति, धातुयो आयतनानी''ति वुत्तेपि एसेव नयो। तस्मा भगवा **पच्चत्तपुरिसकारदीपनत्थं आनन्तरियदीपनत्थं ब्रह्मविहारदीपनत्थं पुब्बेनिवासदीपनत्थञ्च** पुग्गलकथं कथेति।

''खन्धा दानं पटिग्गण्हन्ति, धातुयो आयतनानी''ति वुत्तेपि महाजनो न जानाति, सम्मोहं आपज्जति, पटिसत्तु वा होति ''किमिदं खन्धा धातुयो आयतनानि पटिग्गण्हन्ति नामा''ति? ''पुग्गला पटिग्गण्हन्ती''ति पन वुत्ते जानाति, न सम्मोहं आपज्जति, न पटिसत्तु वा होति। तस्मा भगवा **दक्खिणाविसुद्धिदीपनत्थं** पुग्गलकथं कथेति।

लोकसम्मुतिञ्च बुद्धा भगवन्तो न पजहन्ति, लोकसमञ्ञाय लोकनिरुत्तिया लोकाभिलापे ठितायेव धम्मं देसेन्ति। तस्मा भगवा **लोकसम्मुतिया अप्पहानत्थम्पि** पुग्गलकथं कथेति। सो इधापि लोकवोहारवसेन देसेतब्बमत्थं दस्सेन्तो ''एकपुग्गलस्सा''तिआदिमाह।

तत्थ **एकपुग्गलस्सा**ति एकसत्तस्स। **कप्पन्ति** महाकप्पं। यदिपि अच्चन्तसंयोगे इदं उपयोगवचनं, यत्थ पन सत्तानं सन्धावनं संसरणं सम्भवति, तस्स वसेन गहेतब्बं। **अट्ठिकङ्कलो**ति अट्ठिभागो। ''अट्ठिखलो''तिपि पठन्ति, अट्ठिसञ्चयोति अत्थो। **अट्ठिपुञ्जो**ति अट्ठिसमूहो। **अट्ठिरासी**ति तस्सेव वेवचनं। केचि पन ''कटिप्पमाणतो हेट्ठा समूहो कङ्कलो नाम, ततो उपरि याव तालप्पमाणं पुञ्जो, ततो उपरि रासी''ति वदन्ति। तं तेसं मतिमत्तं। सब्बमेतं समूहस्सेव परियायवचनं वेपुल्लस्सेव उपमाभावेन आहटत्ता।

सचे संहारको अस्साति अविप्पकिरणवसेन संहरित्वा ठपेता कोचि यदि सियाति परिकप्पनवसेन वदति। **सम्भतञ्च न विनस्सेय्या**ति तथा केनचि सम्भतञ्च तं अट्ठिकङ्कलं अन्तरधानाभावेन पूतिभूतं चुण्णविचुण्णञ्च अहुत्वा सचे न विनस्सेय्याति परिकप्पनवसेनेव वदति। अयञ्हेत्थ अत्थो – भिक्खवे, एकस्स सत्तस्स कम्मकिलेसेहि अपरापरुप्पत्तिवसेन एकं महाकप्पं सन्धावन्तस्स संसरन्तस्स एवं महाअट्ठिसञ्चयो भवेय्य, आरोहपरिणाहेहि यत्तकोयं वेपुल्लपब्बतो। सचे पनस्स कोचि संहरित्वा ठपेता भवेय्य, सम्भतञ्च तं सचे अविनस्सन्तं तिट्ठेय्याति। अयञ्च नयो निब्बुतप्पदीपे विय भिज्जनसभावे कळेवरनिक्खेपरहिते ओपपातिकत्तभावे सब्बेन सब्बं अनट्ठिके च खुद्दकत्तभावे वज्जेत्वा वुत्तो। केचि पन ''परिकप्पनवसेन इमस्स नयस्स आहटत्ता तेसम्पि यदि सिया अट्ठिकङ्कलो, तेनापि सहेव अयं अट्ठिपुञ्जपरिमाणो वुत्तो''ति वदन्ति। अपरे पन ''नयिदमेवं लब्भमानस्सेव अट्ठिपुञ्जस्स वसेन सब्बञ्ञुतञ्ञाणेन परिच्छिन्दित्वा इमस्स परिमाणस्स वुत्तता। तस्मा वुत्तनयेनेव अत्थो गहेतब्बो''ति।

गाथासु **महेसिना**ति महन्ते सीलक्खन्धादयो एसति गवेसतीति महेसी, सम्मासम्बुद्धो। ''इति वुत्तं महेसिना''ति च भगवा ''दसबलसमन्नागतो, भिक्खवे, तथागतो''तिआदीसु विय अत्तानं अञ्ञं विय कत्वा दस्सेति। **वेपुल्लो**ति राजगहं परिवारेत्वा ठितेसु पञ्चसु पब्बतेसु विपुलभावतो वेपुल्लोति लद्धनामो। ततो एव **महा,** ठितदिसाभागवसेन **उत्तरो गिज्झकूटस्स। गिरिब्बजे**ति गिरिब्बजपुरनामकस्स राजगहस्स समीपे।

एत्तावता भगवा ''एत्तकेनापि कालेन अनुपच्छिन्नभवमूलस्स अपरिञ्ञातवत्थुकस्स पुथुज्जनस्स अयमीदिसी कटसिवड्ढना''ति वट्टे आदीनवं दस्सेत्वा इदानि येसं अरियसच्चानं अननुबोधा अप्पटिवेधा अन्धपुथुज्जनस्स एवं कटसिवड्ढना, तानि अरियसच्चानि दिट्ठवतो अरियपुग्गलस्स अयं नत्थीति दस्सेन्तो **''यतो च अरियसच्चानी''**तिआदिमाह।

तत्थ **यतो**ति यदा। **अरियसच्चानी**ति अरणीयतो अरियानि, अवितथभावेन सच्चानि चाति अरियसच्चानि, अरियभावकरानि वा सच्चानि अरियसच्चानि, अरियेहि वा बुद्धादीहि पटिविज्झितब्बानि सच्चानि अरियसच्चानि। अथ वा अरियस्स सच्चानि अरियसच्चानि। सदेवकेन हि लोकेन सरणन्ति अरणीयतो अरियो भगवा, तेन सयम्भुञाणेन दिट्ठत्ता तस्स सच्चानीति अरियसच्चानि। **सम्मप्पञ्ञाय पस्सती**ति सम्मा हेतुना ञायेन विपस्सनापञ्ञासहिताय मग्गपञ्ञाय परिञ्ञापहानसच्छिकिरियाभावनाभिसमयवसेन पस्सति। **दुक्ख**न्तिआदि अरियसच्चानं सरूपदस्सनं। तत्थ अनेकूपद्दवाधिट्ठानताय कुच्छितभावतो बालजनपरिकप्पितधुवसुभसुखत्तविरहेन तुच्छभावतो च **दुक्खं**। दुक्खं समुप्पज्जति एतेनाति **दुक्खसमुप्पादो,** दुक्खसमुदयो। दुक्खं अतिक्कमति एतेन आरम्मणप्पच्चयभूतेन, एत्थ वाति **दुक्खस्स अतिक्कमो,** निब्बानं। आरकत्ता किलेसेहि अरणीयतो च **अरियो**। सम्मादिट्ठिआदीनं अट्ठन्नं अङ्गानं वसेन **अट्ठङ्गिको**। मारेन्तो किलेसे गच्छति, निब्बानत्थिकेहि मग्गीयति, सयं वा निब्बानं मग्गतीति **मग्गो**। ततो एव दुक्खस्स उपसमं निरोधं गच्छतीति **दुक्खूपसमगामी**। यतो सम्मप्पञ्ञाय पस्सतीति सम्बन्धो।

स सत्तक्खत्तुं परमं, सन्धावित्वान पुग्गलोति सो एवं चतुसच्चदस्सावी अरियपुग्गलो सोतापन्नो सब्बमुदिन्द्रियो समानो सत्तवारपरमंयेव भवादीसु अपरापरुप्पत्तिवसेन सन्धावित्वा संसरित्वा। एकबीजी, कोलंकोलो, सत्तक्खत्तुपरमोति इन्द्रियानं तिक्खमज्झिममुदुभावेन तयो हि सोतापन्ना। तेसु सब्बमुदिन्द्रियस्स वसेनिदं वुत्तं ''स सत्तक्खत्तुं परमं, सन्धावित्वाना''ति। **दुक्खस्सन्तकरो होती**ति वट्टदुक्खस्स अन्तकरो परियोसानकरो होति। कथं? **सब्बसंयोजनक्खया** अनुपुब्बेन अग्गमग्गं अधिगन्त्वा निरवसेसानं संयोजनानं खेपनाति अरहत्तफलेनेव देसनाय कूटं गण्हि।

चतुत्थसुत्तवण्णना निट्ठिता।

५. मुसावादसुत्तवण्णना

२५. पञ्चमे **एकधम्मं अतीतस्सा**ति का उप्पत्ति? भगवतो भिक्खुसङ्घस्स च महालाभसक्कारो उप्पज्जि, तित्थियानं परिहायि। ते हतलाभसक्कारा निप्पभा नित्तेजा इस्सापकता चिञ्चमाणविकं नाम परिब्बाजिकं उय्योजेसुं – ''एहि, त्वं भगिनि, समणं गोतमं अभूतेन अब्भाचिक्खस्सू''ति। सा भगवन्तं चतुपरिसमज्झे धम्मं देसेन्तं उपगन्त्वा अभूतेन अब्भाचिक्खित्वा सक्केनस्सा अभूतभावे पकासिते महाजनेन ''धी काळकण्णी''ति विहारतो निक्कड्ढापिता पथविया विवरे दिन्ने अवीचिजालानं इन्धनं हुत्वाव अवीचिनिरये निब्बत्ति, भिय्योसोमत्ताय तित्थियानं लाभसक्कारो परिहायि। भिक्खू धम्मसभायं कथं समुट्ठापेसुं ''आवुसो, चिञ्चमाणविका एवं उळारगुणं अग्गदक्खिणेय्यं सम्मासम्बुद्धं अभूतेन अक्कोसित्वा महाविनासं पत्ता''ति। सत्था आगन्त्वा ''काय नुत्थ, भिक्खवे, एतरहि कथाय सन्निसिन्ना''ति पुच्छित्वा ''इमाय नामा''ति वुत्ते ''न, भिक्खवे, इदानेव, पुब्बेपि सा मं अभूतेन अक्कोसित्वा महाविनासं पत्तायेवा''ति महापदुमजातकम्पि वित्थारेत्वा उपरि धम्मं देसेन्तो इमिस्सा अट्ठुप्पत्तिया ''एकधम्मं अतीतस्सा''ति इदं सुत्तं देसेसि।

तत्थ **एकधम्म**न्ति एकं वचीसच्चसङ्खातं धम्मं। **अतीतस्सा**ति या सा अट्ठ अनरियवोहारे वज्जेत्वा अट्ठसु

अरियवोहारेसु पतिट्ठापनत्थं ''सच्चं, भणे, नालिक''न्ति अरियेहि ठपिता मरियादा, तं अतिक्कमित्वा ठितस्स। पुरिसो एव पुग्गलोति **पुरिसपुग्गलो,** तस्स। **अकरणीय**न्ति कातुं असक्कुणेय्यं। सम्पजानमुसावादी हि पुग्गलो किञ्चि पापकम्मं कत्वा ''इदं नाम तया कत''न्ति वुत्ते ''न मया कत''न्ति मुसावादेनेव परिहरिस्सति। एवञ्च पटिपज्जन्तो किञ्चि पापकम्मं करोतियेव, न तत्थ लज्जति सच्चमरियादाय समतिक्कन्तत्ता। तेन वुत्तं ''कतमं एकधम्मं, यदिदं, भिक्खवे, सम्पजानमुसावादो''ति।

गाथायं **मुसावादिस्सा**ति मुसा अभूतं अतच्छं परेसं विञ्ञापनवसेन वदनसीलस्स। यस्स दससु वचनेसु एकम्पि सच्चं नत्थि, एवरूपे वत्तब्बमेव नत्थि। **जन्तुनो**ति सत्तस्स। सत्तो हि जायनट्ठेन ''जन्तू''ति वुच्चति। **वितिण्णपरलोकस्सा**ति विस्सट्ठपरलोकस्स। ईदिसो हि मनुस्ससम्पत्ति देवलोकसम्पत्ति अवसाने निब्बानसम्पत्तीति इमा तिस्सोपि सम्पत्तियो न पस्सति। **नत्थि पाप**न्ति तस्स तादिसस्स इदं नाम पापं न कत्तब्बन्ति नत्थीति।

पञ्चमसुत्तवण्णना निट्ठिता।

६. दानसुत्तवण्णना

२६. छट्ठे **एवञ्चे**ति एत्थ **एव**न्ति उपमाकारे निपातो, **चे**ति परिकप्पने। **सत्ता**ति रूपादीसु सत्ता विसत्ता। **जानेय्यु**न्ति बुज्झेय्युं। **दानसंविभागस्सा**ति याय हि चेतनाय अन्नादिदेय्यधम्मं संहरित्वा अनुकम्पापूजासु अञ्ञतरवसेन परेसं दीयति, तं दानं। याय पन अत्तना परिभुञ्जितब्बभावेन गहितवत्थुस्स एकदेसो संविभजित्वा दीयति, अयं संविभागो। **विपाक**न्ति फलं। **यथाहं जानामी**ति यथा अहं जानामि। इदं वुत्तं होति – तिरच्छानगतस्सपि दानं दत्वा अत्तभावसते पवत्तसुखविपच्चनवसेन सतगुणा दक्खिणा होतीति एवमादिना, भिक्खवे, येन पकारेन अहं दानस्स संविभागस्स च विपाकं कम्मविपाकं ञाणबलेन पच्चक्खतो जानामि, एवं इमे सत्ता यदि जानेय्युन्ति। **न अदत्वा भुञ्जेय्यु**न्ति यं भुञ्जितब्बयुत्तकं अत्तनो अत्थि, ततो परेसं न अदत्वा मच्छरियचित्तेन च तण्हालोभवसेन च भुञ्जेय्युं, दत्वाव भुञ्जेय्युं। **न च नेसं मच्छेरमलं चित्तं परियादाय तिट्ठेय्या**ति अत्तनो सम्पत्तीनं परेहि साधारणभावासहनलक्खणं चित्तस्स पभस्सरभावदूसकानं उपक्किलेसभूतानं कण्हधम्मानं अञ्ञतरं मच्छेरमलं। अथ वा यथावुत्तमच्छेरञ्चेव अञ्ञम्पि दानन्तरायकरं इस्सालोभदोसादिमलञ्च नेसं सत्तानं चित्तं यथा दानचेतना न पवत्तति, न वा सुपरिसुद्धा होति, एवं परियादाय परितो गहेत्वा अभिभवित्वा न तिट्ठेय्य। को हि सम्मदेव दानफलं जानन्तो अत्तनो चित्ते मच्छेरमलस्स ओकासं ददेय्य।

योपि नेसं अस्स चरिमो आलोपोति नेसं सत्तानं यो सब्बपच्छिमको आलोपो सिया। **चरिमं कबळ**न्ति तस्सेव वेवचनं। इदं वुत्तं होति – इमे सत्ता पकतिया यत्तकेहि आलोपेहि सयं यापेय्युं, तेसु एकमेव आलोपं अत्तनो अत्थाय ठपेत्वा तदञ्ञे सब्बे आलोपे आगतागतानं अत्थिकानं दत्वा यो ठपितो आलोपो अस्स, सो इध चरिमो आलोपो नाम। **ततोपि न असंविभजित्वा भुञ्जेय्युं, सचे नेसं पटिग्गाहका अस्सू**ति नेसं सत्तानं पटिग्गाहका यदि सियुं, ततोपि यथावुत्तचरिमालोपतोपि संविभजित्वाव एकदेसं दत्वाव भुञ्जेय्युं, यथाहं दानसंविभागस्स विपाकं पच्चक्खतो जानामि, एवं यदि जानेय्युन्ति। **यस्मा च खो**तिआदिना कम्मफलस्स अप्पच्चक्खभावतो एवमेते सत्ता दानसंविभागेसु न पवत्तन्तीति यथाधिप्पेतमत्थं कारणेन सम्पटिपादेति। एतेनेव तेसं तदञ्ञपुञ्ञेसु च अप्पटिपत्तिया अपुञ्ञेसु च पटिपत्तिया कारणं दस्सितन्ति दट्ठब्बं।

गाथासु **यथावुत्तं महेसिना**ति महेसिना भगवता ''तिरच्छानगते दानं दत्वा सतगुणा दक्खिणा पाटिकङ्खितब्बा' तिआदिना, इधेव वा ''एवं चे सत्ता जानेय्यु''न्तिआदिना यथावुत्तं, ञाणचारेन तं यथावुत्तं चित्तं ञातन्ति अत्थो। **विपाकं संविभागस्सा**ति संविभागस्सपि विपाकं, को पन वादो दानस्स। **यथा होति महप्फल**न्ति यथा सो विपाको महन्तं फलं होति, एवं इमे सत्ता यदि जानेय्युन्ति सम्बन्धो। **विनेय्य मच्छेरमल**न्ति मच्छरियमलं अपनेत्वा कम्मफलसद्धाय रतनत्तयसद्धाय च विसेसतो पसन्नेन चित्तेन येसु किलेसेहि आरकत्ता अरियेसु सीलादिगुणसम्पन्नेसु दिन्नं अप्पकम्पि दानं महप्फलं होति, तेसु युत्तकालेन **दज्जुं** ददेय्युं।

महप्फलभावकरणतो दक्खिणं अरहन्तीति दक्खिणेय्या, सम्मापटिपन्ना, तेसु **दक्खिणेय्येसु। दक्खिणं** परलोकं सद्दहित्वा दातब्बं देय्यधम्मं यथा तं दानं होति महादानं, एवं दत्वा। अथ वा बहुनो अन्नं दत्वा, कथं पन अन्नं दातब्बन्ति आह ''दक्खिणेय्येसु दक्खिण''न्ति। **इतो मनुस्सत्ता** मनुस्सत्तभावतो **चुता** पटिसन्धिवसेन **सग्गं गच्छन्ति दायका। कामकामिनो**ति कामेतब्बानं उळारानं देवभोगानं पटिलद्धरूपविभवेन कम्मुना उपगमने साधुकारिताय कामकामिनो सब्बकामसमङ्गिनो। **मोद**न्ति यथारुचि परिचारेन्तीति अत्थो।

छट्ठसुत्तवण्णना निट्ठिता।

७. मेत्ताभावनासुत्तवण्णना

२७. सत्तमे **यानि कानिची**ति अनवसेसपरियादानं। **ओपधिकानि पुञ्ञकिरियवत्थूनी**ति

तेसं नियमनं। तत्थ उपधि वुच्चन्ति खन्धा, उपधिस्स करणं सीलं एतेसं, उपधिप्पयोजनानि वा **ओपधिकानि**। सम्पत्तिभवे अत्तभावजनकानि पटिसन्धिपवत्तिविपाकदायकानि। **पुञ्ञकिरियवत्थूनी**ति पुञ्ञकिरिया च ता तेसं तेसं फलानिसंसानं वत्थूनि चाति पुञ्ञकिरियवत्थूनि। तानि पन सङ्खेपतो दानमयं, सीलमयं, भावनामयन्ति तिविधानि होन्ति। तत्थ यं वत्तब्बं, तं परतो तिकनिपातवण्णनायं आवि भविस्सति। **मेत्ताय चेतोविमुत्तिया**ति मेत्ताभावनावसेन पटिलद्धतिकचतुक्कज्झानसमापत्तिया। ''मेत्ता''ति हि वुत्ते उपचारोपि लब्भति अप्पनापि, ''चेतोविमुत्ती''ति पन वुत्ते अप्पनाझानमेव लब्भति। तञ्हि नीवरणादिपच्चनीकधम्मतो चित्तस्स सुट्ठु विमुत्तिभावेन चेतोविमुत्तीति वुच्चति। **कलं नाग्घन्ति सोळसि**न्ति मेत्ताब्रह्मविहारस्स सोळसभागं ओपधिकानि पुञ्ञकिरियवत्थूनि न अग्घन्ति। इदं वुत्तं होति — मेत्ताय चेतोविमुत्तिया यो विपाको, तं सोळस कोट्ठासे कत्वा ततो एकं पुन सोळस कोट्ठासे कत्वा तत्थ यो एककोट्ठासो, न तं अञ्ञानि ओपधिकानि पुञ्ञकिरियवत्थूनि अग्घन्तीति। **अधिग्गहेत्वा**ति अभिभवित्वा। **भासते**ति उपक्किलेसविसुद्धिया दिप्पति। **तपते**ति ततो एव अनवसेसे पटिपक्खधम्मे सन्तपति। **विरोचती**ति उभयसम्पत्तिया विरोचति। मेत्ता हि चेतोविमुत्ति चन्दालोकसङ्खाता विगतूपक्किलेसा जुण्हा विय दिप्पति, आतपो विय अन्धकारं पच्चनीकधम्मे विधमन्ती तपति, ओसधितारका विय विज्जोतमाना विरोचति च।

सेय्यथापीति ओपम्मदस्सनत्थे निपातो। **तारकरूपान**न्ति जोतीनं। **चन्दिया**ति चन्दस्स अयन्ति चन्दी, तस्सा चन्दिया, पभाय जुण्हायाति अत्थो। **वस्सान**न्ति वस्सानं बहुवसेन लद्धवोहारस्स उतुनो। **पच्छिमे मासे**ति कत्तिकमासे। **सरदसमये**ति सरदकाले। अस्सयुजकत्तिकमासा हि लोके ''सरदउतू''ति वुच्चन्ति। **विद्धे**ति उब्बिद्धे, मेघविगमेन दूरीभूतेति अत्थो। तेनेवाह **''विगतवलाहके''**ति। **देवे**ति आकासे। **नभं अब्भुस्सक्कमानो**ति उदयट्ठानतो आकासं उल्लङ्घन्तो। **तमगत**न्ति तमं। **अभिविहच्चा**ति अभिहन्त्वा विधमित्वा। **ओसधितारका**ति उस्सन्ना पभा एताय धीयति,

ओसधीनं वा अनुबलप्पदायिकत्ता ओसधीति लद्धनामा तारका।

एत्थाह – कस्मा पन भगवता समानेपि ओपधिकभावे मेत्ता इतरेहि ओपधिकपुञ्ञेहि विसेसेत्वा वुत्ताति? वुच्चते – सेट्ठट्ठेन निद्दोसभावेन च सत्तेसु सुप्पटिपत्तिभावतो। सेट्ठा हि एते विहारा, सब्बसत्तेसु सम्मापटिपत्तिभूतानि यदिदं मेत्ताझानानि। यथा च ब्रह्मानो निद्दोसचित्ता विहरन्ति, एवं एतेहि समन्नागता योगिनो ब्रह्मसमाव हुत्वा विहरन्ति। तथा हिमे ''ब्रह्मविहारा''ति वुच्चन्ति। इति सेट्ठट्ठेन निद्दोसभावेन च सत्तेसु सुप्पटिपत्तिभावतो मेत्ताव इतरेहि ओपधिकपुञ्ञेहि विसेसेत्वा वुत्ता।

एवम्पि कस्मा मेत्ताव एवं विसेसेत्वा वुत्ता? इतरेसं ब्रह्मविहारानं अधिट्ठानभावतो दानादीनं सब्बेसं कल्याणधम्मानं परिपूरिकत्ता च। अयञ्हि सत्तेसु हिताकारप्पवत्तिलक्खणा मेत्ता, हितूपसंहारसा, आघातविनयपच्चुपट्ठाना। यदि अनोधिसो भाविता बहुलीकता, अथ सुखेनेव करुणादिभावना सम्पज्जन्तीति मेत्ता इतरेसं ब्रह्मविहारानं अधिट्ठानं। तथा हि सत्तेसु हितज्झासयताय सति नेसं दुक्खासहनता, सम्पत्तिविसेसानं चिरट्ठितिकामता, पक्खपाताभावेन सब्बत्थ समप्पवत्तचित्तता च सुखेनेव इज्झन्ति। एवञ्च सकललोकहितसुखविधानाधिमुत्ता महाबोधिसत्ता ''इमस्स दातब्बं, इमस्स न दातब्ब''न्ति उत्तमविचयवसेन विभागं अकत्वा सब्बसत्तानं निरवसेससुखनिदानं दानं देन्ति, हितसुखत्थमेव नेसं सीलं समादियन्ति, सीलपरिपूरणत्थं नेक्खम्मं भजन्ति, तेसं हितसुखेसु असम्मोहत्थाय पञ्ञं परियोदपेन्ति, हितसुखाभिवड्ढनत्थमेव दळ्हं वीरियमारभन्ति, उत्तमवीरियवसेन वीरभावं पत्तापि सत्तानं नानप्पकारं हितज्झासयेनेव अपराधं खमन्ति, ''इदं वो दस्साम, करिस्सामा''तिआदिना कतं पटिञ्ञातं न विसंवादेन्ति, तेसं हितसुखायेव अचलाधिट्ठाना होन्ति। तेसु अचलाय मेत्ताय पुब्बकारिनो हितज्झासयेनेव नेसं विप्पकारे उदासीना होन्ति, पुब्बकारितायपि न पच्चुपकारमासिसन्तीति। एवं ते पारमियो पूरेत्वा याव दसबलचतु-वेसारज्ज-छअसाधारणञाण-अट्ठारसावेणिकबुद्धधम्मप्पभेदे सब्बेपि कल्याणधम्मे परिपूरेन्ति। एवं दानादीनं सब्बेसं कल्याणधम्मानं पारिपूरिका मेत्ताति च इमस्स विसेसस्स दस्सनत्थं सा इतरेहि विसेसेत्वा वुत्ता।

अपिच मेत्ताय इतरेहि ओपधिकपुञ्ञेहि महानुभावता वेलामसुत्तेन दीपेतब्बा। तत्थ हि यथा नाम महता वेलामस्स दानतो एकस्स सोतापन्नस्स दानं महप्फलतरं वुत्तं, एवं सोतापन्नसततो एकस्स सकदागामिस्स दानं…पे॰… पच्चेकबुद्धसततो भगवतो, ततोपि बुद्धप्पमुखस्स सङ्घस्स दानं, ततोपि चातुद्दिसस्स सङ्घस्स विहारदानं, ततोपि सरणगमनं, ततोपि सीलसमादानं, ततोपि गद्दूहनमत्तं कालं मेत्ताभावना महप्फलतरा वुत्ता। यथाह –

> ''यं गहपति वेलामो ब्राह्मणो दानं अदासि महादानं। यो चेकं दिट्ठिसम्पन्नं भोजेय्य, इदं ततो महप्फलतरं। यो च सतं दिट्ठिसम्पन्नं भोजेय्य…पे॰… सुरामेरयमज्जप्पमादट्ठाना वेरमणिं। यो च अन्तमसो गद्दूहनमत्तम्पि मेत्तचित्तं भावेय्य, इदं ततो महप्फलतर''न्ति (अ॰ नि॰ ९.२०)।

महग्गतपुञ्ञभावेन पनस्सा परित्तपुञ्ञतो सातिसयताय वत्तब्बमेव नत्थि। वुत्तञ्हेतं ''यं पमाणकतं कम्मं, न तं तत्रावसिस्सति, न तं तत्रावतिट्ठती''ति (दी॰ नि॰ १.५५६; सं॰ नि॰ ४.३६०)। कामावचरकम्मञ्हि पमाणकतं नाम, महग्गतकम्मं पन पमाणं अतिक्कमित्वा ओधिसकानोधिसकफरणवसेन वड्ढित्वा कतत्ता अप्पमाणकतं नाम। कामावचरकम्मं तस्स महग्गतकम्मस्स अन्तरा लग्गितुं वा तं कम्मं अभिभवित्वा अत्तनो विपाकस्स ओकासं गहेत्वा ठातुं वा न सक्कोति, अथ खो महग्गतकम्ममेव तं परित्तकम्मं महोघो विय परित्तं उदकं अभिभवित्वा अत्तनो ओकासं गहेत्वा तिट्ठति, तस्स विपाकं पटिबाहित्वा सयमेव ब्रह्मसहब्यतं उपनेतीति अयञ्हि तस्स अत्थोति।

गाथासु **यो**ति यो कोचि गहट्ठो वा पब्बजितो वा। **मेत्त**न्ति मेत्ताझानं। **अप्पमाण**न्ति भावनावसेन आरम्मणवसेन च अप्पमाणं। असुभभावनादयो विय हि आरम्मणे एकदेसग्गहणं अकत्वा अनवसेसफरणवसेन अनोधिसोफरणवसेन च अप्पमाणारम्मणताय पगुणभावनावसेन अप्पमाणं। **तनू संयोजना होन्ती**ति मेत्ताझानं पादकं कत्वा सम्मसित्वा हेट्ठिमे अरियमग्गे अधिगच्छन्तस्स सुखेनेव पटिघसंयोजनादयो पहीयमाना तनू होन्ति। तेनाह ''पस्सतो उपधिक्खय''न्ति। ''उपधिक्खयो''ति हि निब्बानं वुच्चति। तञ्चस्स सच्छिकिरियाभिसमयवसेन मग्गञाणेन पस्सति। अथ वा **तनू संयोजना होन्ती**ति मेत्ताझानपदट्ठानाय विपस्सनाय अनुक्कमेन उपधिक्खयसङ्खातं अरहत्तं पत्वा तं पस्सतो पगेव दसपि संयोजना तनू होन्ति, पहीयन्तीति अत्थो। अथ वा **तनू संयोजना होन्ती**ति पटिघो चेव पटिघसम्पयुत्तसंयोजना च तनुका होन्ति। **पस्सतो उपधिक्खय**न्ति तेसंयेव किलेसूपधीनं खयसङ्खातं मेत्तं अधिगमवसेन पस्सन्त स्साति एवमेत्थ अत्थो दट्ठब्बो।

एवं किलेसप्पहानं निब्बानाधिगमञ्च मेत्ताभावनाय सिखाप्पत्तमानिसंसं दस्सेत्वा इदानि अञ्ञे आनिसंसे दस्सेतुं **''एकम्पि चे''**तिआदिमाह। तत्थ **अदुट्ठचित्तो**ति मेत्ताबलेन सुट्ठु विक्खम्भितब्यापादताय ब्यापादेन अदूसितचित्तो। **मेत्तायती**ति हितफरणवसेन मेत्तं करोति। **कुसलो**ति अतिसयेन कुसलवा महापुञ्ञो, पटिघादिअनत्थविगमेन वो। खेमी **तेना**ति तेन मेत्तायितेन। **सब्बे च पाणे**ति चसद्दो ब्यतिरेके। **मनसानुकम्प**न्ति चित्तेन अनुकम्पन्तो। इदं वुत्तं होति – एकसत्तविसयापि ताव मेत्ता महाकुसलरासि, सब्बे पन पाणे अत्तनो पियपुत्तं विय हितफरणेन मनसा अनुकम्पन्तो पहूतं बहुं अनप्पकं अपरियन्तं चतुसट्ठिमहाकप्पेपि अत्तनो विपाकप्पबन्धं पवत्तेतुं समत्थं उळारपुञ्ञं अरियो परिसुद्धचित्तो पुग्गलो पकरोति निप्फादेति।

सत्तसण्डन्ति सत्तसङ्खातेन सण्डेन समन्नागतं भरितं, सत्तेहि अविरळं आकिण्णमनुस्सन्ति अत्थो। **विजित्वा**ति अदण्डेन असत्थेन धम्मेनेव विजिनित्वा। **राजिसयो**ति इसिसदिसा धम्मिकराजानो। **यजमाना**ति दानानि ददमाना। **अनुपरियगा**ति विचरिंसु।

अस्समेधन्तिआदीसु पोराणकराजकाले किर सस्समेधं, पुरिसमेधं, सम्मापासं, वाचापेय्यन्ति चत्तारि सङ्गहवत्थूनि अहेसुं, येहि राजानो लोकं सङ्गण्हिंसु। तत्थ निप्फन्नसस्सतो दसमभागग्गहणं **सस्समेधं** नाम, सस्ससम्पादने, मेधावितानि अत्थो। महायोधानं छमासिकं भत्तवेतनानुप्पदानं **पुरिसमेधं** नाम, पुरिससङ्गण्हने मेधावितानि अत्थो। दलिद्दमनुस्सानं पोत्थके लेखं गहेत्वा तीणि वस्सानि विना वड्ढिया सहस्सद्विसहस्समत्तधनानुप्पदानं **सम्मापासं** नाम। तञ्हि सम्मा मनुस्से पासेति हदये बन्धित्वा विय ठपेति, तस्मा ''सम्मापास''न्ति वुच्चति। ''तात मातुला''तिआदिना पन सण्हवाचाय सङ्गहणं **वाचापेय्यं** नाम, पेय्यवज्जं पियवाचताति अत्थो। एवं चतूहि सङ्गहवत्थूहि सङ्गहितं रट्ठं इद्धञ्चेव होति फीतञ्च पहूतअन्नपानं खेमं निरब्बुदं। मनुस्सा मुदा मोदमाना उरे पुत्ते नच्चेन्ता अपारुतघरा विहरन्ति। इदं घरद्वारेसु अग्गळानं अभावतो **''निरग्गळ''**न्ति वुच्चति। अयं पोराणिका पवेणि, अयं पोराणिका पकति।

अपरभागे पन ओक्काकराजकाले ब्राह्मणा इमानि चत्तारि सङ्गहवत्थूनि इमञ्च रट्ठसम्पत्तिं परिवत्तेन्ता उद्धम्मूलं कत्वा अस्समेधं पुरिसमेधन्तिआदिके पञ्च यञ्ञे नाम अकंसु। वुत्तञ्हेतं भगवता ब्राह्मणधम्मियसुत्ते –

''तेसं आसि विपल्लासो, दिस्वान अणुतो अणुं...पे०...॥

''ते तत्थ मन्ते गन्थेत्वा, ओक्काकं तदुपागमु''न्ति॥ (सु० नि० ३०१-३०४)।

तत्थ अस्समेत्थ मेधन्ति बाधेन्तीति **अस्समेधो**। द्वीहि परियञ्ञेहि यजितब्बस्स एकवीसतियूपस्स एकस्मिं पच्छिमदिवसे एव सत्तनवुतिपञ्चपसुसतघातभीसनस्स ठपेत्वा भूमिञ्च पुरिसे च अवसेससब्बविभवदक्खिणस्स यञ्ञस्सेतं अधिवचनं। पुरिसमेत्थ मेधन्ति बाधेन्तीति **पुरिसमेधो**। चतूहि परियञ्ञेहि यजितब्बस्स सद्धिंभूमिया अस्समेधे वुत्तविभवदक्खिणस्स यञ्ञस्सेतं अधिवचनं। सम्ममेत्थ पासन्ति खिपन्तीति **सम्मापासो**। युगच्छिग्गळे पवेसनदण्डकसङ्खातं सम्मं खिपित्वा तस्स पतितोकासे वेदिं कत्वा संहारिमेहि यूपादीहि सरस्सतिनदिया निमुग्गोकासतो पभुति पटिलोमं गच्छन्तेन यजितब्बस्स सत्रयागस्सेतं अधिवचनं वाजमेत्थ पिवन्तीति **वाजपेय्यो**। एकेन परियञ्ञेन सत्तरसहि पसूहि यजितब्बस्स बेळुवयूपस्स सत्तरसकदक्खिणस्स यञ्ञस्सेतं अधिवचनं। नत्थि एत्थ अग्गळोति **निरग्गळो**। नवहि परियञ्ञेहि यजितब्बस्स सद्धिं भूमिया पुरिसेहि च अस्समेधे वुत्तविभवदक्खिणस्स सब्बमेधपरियायनामस्स अस्समेधविकप्पस्सेतं अधिवचनं।

चन्दप्पभाति चन्दप्पभाय। **तारगणाव सब्बे**ति यथा सब्बेपि तारागणा चन्दिमसोभाय सोळसिम्पि कलं नाग्घन्ति, एवं ते अस्समेधादयो यञ्ञा मेत्तचित्तस्स वुत्तलक्खणेन सुभावितस्स सोळसिम्पि कलं नानुभवन्ति, न पापुणन्ति, नाग्घन्तीति अत्थो।

इदानि अपरेपि दिट्ठधम्मिकसम्परायिके मेत्ताभावनाय आनिसंसे दस्सेतुं **''यो न हन्ती''**तिआदि वुत्तं। तत्थ **यो**ति मेत्ताब्रह्मविहारभावनानुयुत्तो पुग्गलो। **न हन्ती**ति तेनेव मेत्ताभावनानुभावेन दूरविक्खम्भितब्यापादताय न कञ्चि सत्तं हिंसति, लेड्डुदण्डादीहि न विबाधति वा। **न घातेती**ति परं समादपेत्वा न सत्ते हनापेति न विबाधापेति च। **न जिनाती**ति सारम्भविग्गाहिककथादिवसेन न कञ्चि जिनाति सारम्भस्सेव अभावतो, जानिकरणवसेन वा अड्डकरणादिना न कञ्चि जिनाति। **न जापये**ति परेपि पयोजेत्वा परेसं धनजानिं न कारापेय्य। **मेत्तंसो**ति मेत्तामयचित्तकोट्ठासो, मेत्ताय वा अंसो अविजहनट्ठेन अवयवभूतोति मेत्तंसो। **सब्बभूतेसू**ति सब्बसत्तेसु। ततो एव **वेरं तस्स न केनची**ति अकुसलवेरं तस्स केनचिपि कारणेन नत्थि, पुग्गलवेरसङ्खातो विरोधो केनचि पुरिसेन सद्धिं तस्स मेत्ताविहारिस्स नत्थीति।

एवमेतस्मिं एककनिपाते पटिपाटिया तेरससु सुत्तेसु सिक्खासुत्तद्वये चाति पन्नरससु सुत्तेसु विवट्टं कथितं, नीवरणसुत्तं संयोजनसुत्तं अप्पमादसुत्तं अट्ठिसञ्चयसुत्तन्ति एतेसु चतूसु सुत्तेसु वट्टविवट्टं कथितं। इतरेसु पन वट्टमेव कथितन्ति।

सत्तमसुत्तवण्णना निट्ठिता।

परमत्थदीपनिया

खुद्दकनिकाय-अट्ठकथाय

इतिवुत्तकस्स एककनिपातवण्णना निट्ठिता।

२. दुकनिपातो

१. पठमवग्गो

१. दुक्खविहारसुत्तवण्णना

२८. दुकनिपातस्स पठमे **द्वीही**ति गणनपरिच्छेदो। **धम्मेही**ति परिच्छिन्नधम्मनिदस्सनं। **द्वीहि धम्मेही**ति द्वीहि अकुसलधम्मेहि। **समन्नागतो**ति युत्तो। **दिट्ठेव धम्मे**ति इमस्मिंयेव अत्तभावे। **दुक्खं विहरती**ति चतूसुपि इरियापथेसु किलेसदुक्खेन चेव कायिकचेतसिकदुक्खेन च दुक्खं विहरति। **सविघातन्**ति चित्तूपघातेन चेव कायूपघातेन च सविघातं। **सउपायासन्**ति किलेसूपायासेन चेव सरीरखेदेन च बलवआयासवसेन सउपायासं। **सपरिळाहन्**ति किलेसपरिळाहेन चेव कायपरिळाहेन च सपरिळाहं। **कायस्स भेदा**ति उपादिन्नक्खन्धपरिच्चागा। **परं मरणा**ति तदनन्तरं अभिनिब्बत्तक्खन्धग्गहणे। अथ वा **कायस्स भेदा**ति जीवितिन्द्रियुपच्छेदा। **परं मरणा**ति चुतितो उद्धं। **दुग्गति पाटिकङ्खा**ति दुग्गतिसङ्खातानं चतुन्नं अपायानं अञ्ञतरा गति इच्छितब्बा, अवस्संभाविनीति अत्थो।

अगुत्तद्वारोति अपिहितद्वारो। कत्थ पन अगुत्तद्वारोति आह ''**इन्द्रियेसू**''ति। तेन मनच्छट्ठानं इन्द्रियानं असंवरमाह। पटिग्गहणपरिभोगवसेन भोजने मत्तं न जानातीति **भोजने अमत्तञ्ञू**। ''इन्द्रियेसु अगुत्तद्वारताय भोजने अमत्तञ्ञुताया''तिपि पठन्ति।

कथं इन्द्रियेसु अगुत्तद्वारता, कथं वा गुत्तद्वारताति? किञ्चापि हि चक्खुन्द्रिये संवरो वा असंवरो वा नत्थि। न हि चक्खुपसादं निस्साय सति वा मुट्ठस्सच्चं वा उप्पज्जति। अपिच यदा रूपारम्मणं चक्खुस्स आपाथं आगच्छति, तदा भवङ्गे द्विक्खत्तुं उप्पज्जित्वा निरुद्धे किरियामनोधातु आवज्जनकिच्चं साधयमाना उप्पज्जित्वा निरुज्झति, ततो चक्खुविञ्ञाणं दस्सनकिच्चं, ततो विपाकमनोधातु सम्पटिच्छनकिच्चं, ततो विपाकाहेतुकमनोविञ्ञाणधातु सन्तीरणकिच्चं, ततो किरियाहेतुकमनोविञ्ञाणधातु वोट्ठब्बनकिच्चं साधयमाना उप्पज्जित्वा निरुज्झति, तदनन्तरं जवनं जवति। तथापि नेव भवङ्गसमये, न आवज्जनादीनं अञ्ञतरसमये संवरो वा असंवरो वा अत्थि, जवनक्खणे पन सचे दुस्सील्यं वा मुट्ठस्सच्चं वा अञ्ञाणं वा अक्खन्ति वा कोसज्जं वा उप्पज्जति, असंवरो होति। एवं होन्तोपि सो ''चक्खुद्वारे असंवरो''ति वुच्चति। कस्मा? यस्मा तस्मिं सति द्वारम्पि अगुत्तं होति भवङ्गम्पि आवज्जनादीनि वीथिचित्तानिपि। यथा किं? यथा नगरे चतूसु द्वारेसु असंवुतेसु किञ्चापि अन्तोघरद्वारकोट्ठकगब्भादयो सुसंवुता तथापि अन्तोनगरे सब्बं भण्डं अरक्खितं अगोपितमेव होति। नगरद्वारेहि पविसित्वा चोरा यदिच्छन्ति, तं हरेय्युं। एवमेव जवने दुस्सील्यादीसु उप्पन्नेसु तस्मिं असंवरे सतिद्वारम्पि अगुत्तं होति, भवङ्गम्पि आवज्जनादीनि वीथिचित्तानिपि। तस्मिं पन असति जवने सीलादीसु उप्पन्नेसु द्वारम्पि गुत्तं होति भवङ्गम्पि आवज्जनादीनि वीथिचित्तानिपि। यथा किं? यथा नगरद्वारेसु संवुतेसु किञ्चापि अन्तोघरद्वारादयो असंवुता, तथापि अन्तोनगरे सब्बं भण्डं सुरक्खितं सुगोपितमेव होति। नगरद्वारेसु हि पिहितेसु चोरानं पवेसो नत्थि। एवमेव जवने सीलादीसु उप्पन्नेसु द्वारम्पि गुत्तं होति, भवङ्गम्पि, आवज्जनादीनि वीथिचित्तानिपि। तस्मा जवनक्खणे उप्पज्जमानोपि ''चक्खुद्वारे संवरो''ति वुच्चति। सेसद्वारेसुपि एसेव नयो। एवं इन्द्रियेसु अगुत्तद्वारता, गुत्तद्वारता च वेदितब्बा।

कथं पन भोजने अमत्तञ्ञू, कथं वा मत्तञ्ञूति? यो हि पुग्गलो महिच्छो हुत्वा पटिग्गहणे मत्तं न जानाति। महिच्छपुग्गलो हि यथा नाम कच्छपुटवाणिजो पिळन्धनभण्डकं हत्थेन गहेत्वा उच्छङ्गेपि पक्खिपितब्बयुत्तकं पक्खिपित्वा महाजनस्स पस्सन्तस्सेव ''असुकं गण्हथ, असुकं गण्हथा''ति मुखेन उग्घोसेति, एवमेव अप्पमत्तकम्पि अत्तनो सीलं वा गन्थं वा धुतङ्गगुणं वा अन्तमसो अरञ्ञवासमत्तकम्पि महाजनस्स जानन्तस्सेव सम्भावेति, सम्भावेत्वा च पन सकटेहिपि उपनीते पच्चये ''अल''न्ति अवत्वा पटिग्गण्हाति। तयो हि पूरेतुं न सक्का अग्गि उपादानेन, समुद्दो उदकेन, महिच्छो पच्चयेहीति –

''अग्गिक्खन्धो समुद्दो च, महिच्छो चापि पुग्गलो।

बहुके पच्चये दिन्ने, तयोपेते न पूरयेति''॥

महिच्छपुग्गलो हि विजातमातुयापि मनं गण्हितुं न सक्कोति। एवरूपो हि अनुप्पन्नं लाभं न उप्पादेति, उप्पन्नलाभतो च परिहायति। एवं ताव पटिग्गहणे अमत्तञ्ञू होति। यो पन धम्मेन समेन लद्धम्पि आहारं गधितो मुच्छितो अज्झोपन्नो अनादीनवदस्सावी अनिस्सरणपञ्ञो आहरहत्थकअलंसाटकतत्थवट्टककाकमासकभुत्तवमितकब्राह्मणानं अञ्ञतरो विय अयोनिसो अनुपायेन यावदत्थं उदरावदेहकं परिभुञ्जित्वा सेय्यसुखं पस्ससुखं मिद्धसुखं अनुयुत्तो विहरति। अयं परिभोगे अमत्तञ्ञू नाम।

यो पन ''यदिपि देय्यधम्मो बहु होति, दायको अप्पं दातुकामो, दायकस्स वसेन अप्पं गण्हाति। देय्यधम्मो अप्पो, दायको बहुं दातुकामो, देय्यधम्मस्स वसेन अप्पं गण्हाति। देय्यधम्मो बहु, दायकोपि बहुं दातुकामो, अत्तनो थामं ञत्वा पमाणयुत्तमेव गण्हाती''ति एवं वुत्तस्स पटिग्गहणे पमाणजाननस्स चेव, ''पटिसङ्खा योनिसो आहारं आहारेति, नेव दवाय, न मदाया''तिआदिना (ध० स० १३५५) ''लद्धञ्च पिण्डपातं अगधितो अमुच्छितो अनज्झोपन्नो आदीनवदस्सावी निस्सरणपञ्ञो परिभुञ्जती''ति च आदिना नयेन वुत्तस्स पच्चवेक्खित्वा पटिसङ्खानपञ्ञाय जानित्वा आहारपरिभुञ्जनसङ्खातस्स परिभोगे पमाणजाननस्स च वसेन भोजने मत्तञ्ञू होति, अयं भोजने मत्तञ्ञू नाम। एवं भोजने अमत्तञ्ञुता मत्तञ्ञुता च होतीति वेदितब्बं।

गाथासु पन **चक्खु**न्तिआदीसु चक्खतीति चक्खु, रूपं अस्सादेति, समविसमं आचिक्खन्तं विय होतीति वा अत्थो। सुणातीति **सोतं**। घायतीति **घानं**। जीवितनिमित्तं आहाररसो जीवितं, तं अव्हायतीति **जिव्हा**। कुच्छितानं आयोति **कायो**। मनते विजानातीति **मनो**। पोराणा पनाहु मुनातीति **मनो,** नाळिया मिनमानो विय महातुलाय धारयमानो विय च आरम्मणं विजानातीति अत्थो। एवं तावेत्थ पदत्थो वेदितब्बो।

भावत्थतो पन दुविधं चक्खु – मंसचक्खु च पञ्ञाचक्खु च। तेसु बुद्धचक्खु, समन्तचक्खु, ञाणचक्खु, दिब्बचक्खु, धम्मचक्खूति पञ्चविधं **पञ्ञाचक्खु**। तत्थ ''अद्दसं खो अहं, भिक्खवे, बुद्धचक्खुना लोकं वोलोकेन्तो''ति (म० नि० १.२८३) इदं बुद्धचक्खु नाम। ''समन्तचक्खु वुच्चति सब्बञ्ञुतञ्ञाण''न्ति (चूळव० धोतकमाणवपुच्छानिद्देस ३२) इदं समन्तचक्खु नाम। ''चक्खुं उदपादी''ति (सं० नि० ५.१०८१; महाव० १५) इदं ञाणचक्खु नाम। ''अद्दसं खो अहं, भिक्खवे, दिब्बेन चक्खुना विसुद्धेना''ति (म० नि० १.२८४) इदं दिब्बचक्खु नाम। ''विरजं वीतमलं धम्मचक्खुं उदपादी''ति (म० नि० २.३९५; महाव० १६) इदं हेट्ठिममग्गत्तयसङ्खातं धम्मचक्खु नाम।

मंसचक्खुपि दुविधं – ससम्भारचक्खु, पसादचक्खूति। तत्थ य्वायं अक्खिकूपके पतिट्ठितो हेट्ठा अक्खिकूपकट्ठिकेन, उपरि भमुकट्ठिकेन, उभतो अक्खिकूटेहि, अन्तो मत्थलुङ्गेन, बहिद्धा अक्खिलोमेहि परिच्छिन्नो मंसपिण्डो, सङ्खेपतो चतस्सो धातुयो – वण्णो, गन्धो, रसो, ओजासम्भवो सण्ठानं जीवितं भावो कायपसादो चक्खुपसादोति चुद्दस सम्भारा। वित्थारतो चतस्सो धातुयो तंनिस्सिता वण्णगन्धरसओजासण्ठानसम्भवाति इमानि दस चतुसमुट्ठानिकत्ता चत्तालीसं होन्ति, जीवितं भावो कायपसादो चक्खुपसादोति चत्तारि एकन्तकम्मसमुट्ठानेवाति इमेसं चतुचत्तालीसाय रूपानं वसेन चतुचत्तालीस सम्भारा। यं लोके ''सेतं वट्टं पुथुलं विसटं विपुलं चक्खू''ति सञ्जानन्तो न चक्खुं सञ्जानाति, वत्थुं चक्खुतो सञ्जानाति, यो मंसपिण्डो अक्खिकूपके पतिट्ठितो न्हारुसुत्तकेन मत्थलुङ्गेन आबद्धो, यत्थ सेतम्पि अत्थि कण्हम्पि लोहितकम्पि पथवीपि आपोपि तेजोपि वायोपि। यं सेम्हुस्सदत्ता सेतं, पित्तुस्सदत्ता कण्हं, रुहिरुस्सदत्ता लोहितकं, पथवुस्सदत्ता पत्थद्धं, आपुस्सदत्ता पग्घरति, तेजुस्सदत्ता परिडय्हति, वायुस्सदत्ता सम्भमति, इदं

ससम्भारचक्खु नाम। यो पन एत्थ सितो एत्थ पटिबद्धो चतुन्नं महाभूतानं उपादाय पसादो, इदं पसादचक्खु नाम। इदञ्हि चक्खुविञ्ञाणादीनं यथारहं वत्थुद्वारभावेन पवत्तति।

सोतादीसुपि सोतं दिब्बसोतं, मंससोतन्ति दुविधं। एत्थ ''दिब्बाय सोतधातुया विसुद्धाय अतिक्कन्तमानुसिकाय उभो सद्दे सुणाती''ति इदं दिब्बसोतं नाम। मंससोतं पन ससम्भारसोतं पसादसोतन्ति दुविधन्तिआदि सब्बं चक्खुम्हि वुत्तनयेनेव वेदितब्बं, तथा घानजिव्हा। कायो पन चोपनकायो, करजकायो, समूहकायो, पसादकायोतिआदिना बहुविधो। तत्थ –

''कायेन संवुता धीरा, अथो वाचाय संवुता''ति॥ (ध० प० २३४) –

अयं चोपनकायो नाम। ''इमम्हा काया अञ्ञं कायं अभिनिम्मिनाती''ति (दी० नि० १.२३६; पटि० म० ३.१४) अयं करजकायो नाम। समूहकायो पन विञ्ञाणादिसमूहवसेन अनेकविधो आगतो। तथा हि ''छ इमे, आवुसो, विञ्ञाणकाया''तिआदीसु (म० नि० १.१०१) विञ्ञाणसमूहो वुत्तो। ''छ फस्सकाया''तिआदीसु (दी० नि० ३.३२३; म० नि० १.९८) फस्सादिसमूहो। तथा ''कायपस्सद्धि कायलहुता''तिआदीसु (ध० स० ११४) वेदनाक्खन्धादयो। ''इधेकच्चो पथविकायं अनिच्चतो अनुपस्सति, आपोकायं तेजोकायं वायोकायं केसकायं लोमकाय''न्तिआदीसु (पटि० म० ३.३५) पथवादिसमूहो। ''कायेन फोट्ठब्बं फुसित्वा''ति (अ० नि० ३.१६) अयं पसादकायो। इधापि पसादकायो वेदितब्बो। सो हि कायविञ्ञाणादीनं यथारहं वत्थुद्वारभावेन पवत्तति। मनोति पन किञ्चापि सब्बं विञ्ञाणं वुच्चति, तथापि द्वारभावस्स इधाधिप्पेतत्ता द्वारभूतं सावज्जनं भवङ्गं वेदितब्बं।

> ''कामपटिसंयुत्तो तक्को वितक्को…पे०… मिच्छासङ्कप्पो, अयं वुच्चति कामधातु, सब्बेपि अकुसला धम्मा कामधातु। ब्यापादपटिसंयुत्तो तक्को वितक्को…पे०… मिच्छासङ्कप्पो, अयं वुच्चति ब्यापादधातु। दससु आघातवत्थूसु चित्तस्स आघातो पटिघातो…पे०… अनत्तमनता चित्तस्स, अयं वुच्चति ब्यापादधातु। विहिंसापटिसंयुत्तो तक्को वितक्को मिच्छासङ्कप्पो, अयं वुच्चति विहिंसाधातु। इधेकच्चो पाणिना वा लेड्डुना वा दण्डेन वा सत्थेन वा रज्जुया वा अञ्ञतरञ्ञतरेन सत्ते विहेठेति, अयं विहिंसाधातू''ति (विभ० १८२, ९१०) –

आगतत्ता विसेसो लब्भति।

तत्थ द्वे कथा सब्बसङ्गाहिका च असम्भिन्ना च। तत्थ कामधातुया गहिताय इतरा द्वेपि गहिता नाम होन्ति। ततो पन नीहरित्वा अयं ब्यापादधातु, अयं विहिंसाधातूति दस्सेतीति अयं सब्बसङ्गाहिका नाम। कामधातुं कथेन्तो पन भगवा ब्यापादधातुं ब्यापादधातुट्ठाने, विहिंसाधातुं विहिंसाधातुट्ठाने ठपेत्वाव अवसेसं कामधातु नामाति कथेसीति अयं असम्भिन्नकथा नाम।

सुक्कपक्खे वुत्तविपरियायेन अत्थो वेदितब्बो। नेक्खम्मपटिसंयुत्तो वितक्को **नेक्खम्मवितक्को**। सो असुभपुब्बभागे कामावचरो होति, असुभज्झाने रूपावचरो, तं झानं पादकं कत्वा उप्पन्नमग्गफलकाले लोकुत्तरो। अब्यापादपटिसंयुत्तो वितक्को **अब्यापादवितक्को**। सो मेत्तापुब्बभागे कामावचरो होति, मेत्ताझाने रूपावचरो, तं झानं पादकं कत्वा उप्पन्नमग्गफलकाले लोकुत्तरो। अविहिंसापटिसंयुत्तो वितक्को **अविहिंसावितक्को**। सो करुणापुब्बभागे कामावचरो, करुणाज्झाने रूपावचरो, तं झानं पादकं कत्वा उप्पन्नमग्गफलकाले लोकुत्तरो। यदा पन अलोभो सीसं होति, तदा इतरे द्वे तदन्वायिका होन्ति। यदा मेत्ता सीसं होति, तदा इतरे द्वे तदन्वायिका होन्ति। यदा करुणा सीसं होति, तदा इतरे द्वे तदन्वायिका होन्ति।

इमेयेव पन नेक्खम्मसङ्कप्पादयो। अत्थतो हि नेक्खम्मवितक्कादीनं नेक्खम्मसङ्कप्पादीनञ्च नानाकरणं नत्थि, तंसम्पयुत्ता पन सञ्ञादयो नेक्खम्मसञ्ञादयो। नेक्खम्मधातुआदीनं पन यस्मा पाळियं –

> ''नेक्खम्मपटिसंयुत्तो तक्को वितक्को सङ्कप्पो, अयं वुच्चति नेक्खम्मधातु, सब्बेपि कुसला धम्मा नेक्खम्मधातु। अब्यापादपटिसंयुत्तो तक्को वितक्को सङ्कप्पो, अयं वुच्चति अब्यापादधातु। या सत्तेसु मेत्ति मेत्तायना मेत्ताचेतोविमुत्ति, अयं वुच्चति अब्यापादधातु। अविहिंसापटिसंयुत्तो तक्को वितक्को सङ्कप्पो – अयं वुच्चति अविहिंसाधातु। या सत्तेसु करुणा करुणायना करुणाचेतोविमुत्ति – अयं वुच्चति अविहिंसाधातू''ति। (विभ० १८२) –

आगतत्ता विसेसो लब्भति। इधापि सब्बसङ्गाहिका, असम्भिन्नाति द्वे कथा वुत्तनयेनेव वेदितब्बा। सेसं सुविञ्ञेय्यमेव।

गाथासु **वितक्कये**ति वितक्केय्य। **निराकरे**ति अत्तनो सन्तानतो नीहरेय्य विनोदेय्य, पजहेय्याति अत्थो। **सवे वितक्कानि विचारितानि, समेति वुट्ठीव रजं समूहत**न्ति यथा नाम गिम्हानं पच्छिमे मासे पथवियं समूहतं समन्ततो उट्ठितं रजं महतो अकालमेघस्स वस्सतो वुट्ठि ठानसो वूपसमेति, एवमेव सो योगावचरो वितक्कानि मिच्छावितक्के च विचारितानि तंसम्पयुत्तविचारे च समेति वूपसमेति समुच्छिन्दति। तथाभूतो च **वितक्कूपसमेन चेतसा** सब्बेसं मिच्छावितक्कानं उपसमनतो वितक्कूपसमेन अरियमग्गचित्तेन। **इधेव** दिट्ठेव धम्मे, **सन्तिपदं** निब्बानं, **समज्झगा** समधिगतो होतीति।

अट्ठमसुत्तवण्णना निट्ठिता।

९. अन्तरामलसुत्तवण्णना

८८. नवमे **अन्तरामला**ति एत्थ **अन्तरा**सद्दो –

"नदीतीरेसु सण्ठाने, सभासु रथियासु च।
जना सङ्गम्म मन्तेन्ति, मञ्च तञ्च किमन्तर''न्ति॥ –

आदीसु (सं० नि० १.२२८) कारणे आगतो। "अद्दसा मं, भन्ते, अञ्ञतरा इत्थी विज्जन्तरिकाय भाजनं धोवन्ती''तिआदीसु (म० नि० २.१४९) खणे। "अपिचायं तपोदा द्विन्नं महानिरयानं अन्तरिकाय आगच्छती''तिआदीसु (पारा० २३१) विवरे।

"पीतवत्थे पीतधजे, पीतालङ्कारभूसिते।
पीतन्तराहि वग्गूहि, अपिळन्धाव सोभसी''ति॥ –

आदीसु (वि० व० ६५८) उत्तरिसाटके। "यस्सन्तरतो न सन्ति कोपा''तिआदीसु (उदा० २०) चित्ते। इधापि चित्ते एव दट्ठब्बो। तस्मा अन्तरे चित्ते भवा **अन्तरा**। यस्मिं सन्ताने उप्पन्ना, तस्स मलिनभावकरणतो **मला**। तत्थ मलं नाम दुविधं – सरीरमलं, चित्तमलन्ति। तेसु सरीरमलं सेदजल्लिकादि सरीरे निब्बत्तं, तत्थ लग्गं आगन्तुकरजञ्च, तं उदकेनपि नीहरणीयं, न तथा संकिलेसिकं। चित्तमलं पन रागादिसंकिलेसिकं, तं अरियमग्गेहेव नीहरणीयं। वुत्तञ्हेतं पोराणेहि –

"रूपेन संकिलिट्ठेन, संकिलिस्सन्ति माणवा।
रूपे सुद्धे विसुज्झन्ति, अनक्खातं महेसिना॥

"चित्तेन संकिलिट्ठेन, संकिलिस्सन्ति माणवा।
चित्ते सुद्धे विसुज्झन्ति, इति वुत्तं महेसिना''ति॥ (दी० नि० अट्ठ० २.३७३; म० नि० अट्ठ० १.१०६)।

तेनाह भगवा "चित्तसंकिलेसा, भिक्खवे, सत्ता संकिलिस्सन्ति, चित्तवोदाना विसुज्झन्ती''ति (सं० नि० ३.१००)। तस्मा भगवा इधापि चित्तमलविसोधनाय पटिपज्जितब्बन्ति दस्सेन्तो "तयोमे, भिक्खवे, अन्तरामला''ति आह।

यथा चेते लोभादयो सत्तानं चित्ते उप्पज्जित्वा मलिनभावकरा नानप्पकारसंकिलेसविधायकाति अन्तरामला, एवं एकतो भुञ्जित्वा, एकतो सयित्वा, ओतारगवेसी अमित्तसत्तु विय चित्ते एव उप्पज्जित्वा सत्तानं नानाविधअनत्थावहा, नानप्पकारदुक्खनिब्बत्तकाति दस्सेन्तो "**अन्तराअमित्ता**''तिआदिमाह। तत्थ मित्तपटिपक्खतो **अमित्ता,** सपत्तकिच्चकरणतो **सपत्ता,** हिंसनतो **वधका,** उजुविपच्चनीकतो **पच्चत्थिका**।

तत्थ द्वीहि आकारेहि लोभादीनं अमित्तादिभावो वेदितब्बो। वेरीपुग्गलो हि अन्तरं लभमानो अत्तनो वेरिस्स सत्थेन वा सीसं पातेति, उपायेन वा महन्तं अनत्थं उप्पादेति। इमे च लोभादयो पञ्ञासिरपातनेन योनिसम्पटिपादनेन च तादिसं ततो बलवतरं अनत्थं निब्बत्तेन्ति। कथं? चक्खुद्वारस्मिञ्हि इट्ठादीसु आरम्मणेसु आपाथगतेसु यथारहं तानि आरब्भ लोभादयो उप्पज्जन्ति, एत्तावतास्स पञ्ञासिरं पातितं नाम होति। सोतद्वारादीसुपि एसेव नयो। एवं ताव पञ्ञासिरपातनतो अमित्तादिसदिसता वेदितब्बा। लोभादयो पन कम्मनिदाना हुत्वा अण्डजादिभेदा चतस्सो योनियो उपनेन्ति। तस्स योनिउपगमनमूलकानि पञ्चवीसति महाभयानि द्वत्तिंस कम्मकरणानि च आगतानेव होन्ति। एवं योनिसम्पटिपादनतोपि नेसं अमित्तादिसदिसता वेदितब्बा। इति लोभादयो अमित्तादिसदिसताय चित्तसम्भूतताय च "अन्तराअमित्ता''तिआदिना वुत्ता। अपिच अमित्तेहि कातुं असक्कुणेय्यं लोभादयो करोन्ति, अमित्तादिभावो च लोभादीहि जायतीति तेसं अमित्तादिभावो वेदितब्बो। वुत्तञ्हेतं –

''दिसो दिसं यन्तं कयिरा, वेरी वा पन वेरिनं।
मिच्छापणिहितं चित्तं, पापियो नं ततो करे''ति॥ (ध॰ प॰ ४२; उदा॰ ३३)।

गाथासु अत्तनो परेसञ्च अनत्थं जनेतीति **अनत्थजननो**। वुत्तञ्हेतं –

''यदपि लुद्धो अभिसङ्खरोति कायेन वाचाय मनसा तदपि अकुसलं; यदपि लुद्धो लोभेन अभिभूतो परियादिन्नचित्तो परस्स असता दुक्खं उप्पादेति वधेन वा बन्धेन वा जानिया वा गरहाय वा पब्बाजनाय वा बलवम्हि बलत्थो इति, तदपि अकुसलं, इतिस्समे लोभजा लोभनिदाना लोभसमुदया लोभपच्चया अनेके पापका अकुसला धम्मा सम्भवन्ती''ति (अ॰ नि॰ ३.७०)।

अपरम्पि वुत्तं –

''रत्तो खो, ब्राह्मण, रागेन अभिभूतो परियादिन्नचित्तो अत्तब्याबाधायपि चेतेति, परब्याबाधायपि चेतेति, उभयब्याबाधायपि चेतेति, चेतसिकम्पि दुक्खं दोमनस्सं पटिसंवेदेती''तिआदि (अ॰ नि॰ ३.५४)।

चित्तप्पकोपनोति चित्तसङ्खोभनो। लोभो हि लोभनीये वत्थुस्मिं उप्पज्जमानो चित्तं खोभेन्तो पकोपेन्तो विपरिणामेन्तो विकारं आपादेन्तो उप्पज्जति, पसादादिवसेन पवत्तितुं न देति। **भयमन्तरतो जातं, तं जनो नावबुज्झती**ति तं लोभसङ्खातं अन्तरतो अब्भन्तरे अत्तनो चित्तेयेव जातं अनत्थजननचित्तप्पकोपनादिं भयं भयहेतुं अयं बालमहाजनो नावबुज्झति न जानातीति।

लुद्धो अत्थं न जानातीति अत्तत्थपरत्थादिभेदं अत्थं हितं लुद्धपुग्गलो यथाभूतं न जानाति। **धम्मं न पस्सती**ति दसकुसलकम्मपथधम्मम्पि लुद्धो लोभेन अभिभूतो परियादिन्नचित्तो न पस्सति पच्चक्खतो न जानाति, पगेव उत्तरिमनुस्सधम्मं। वुत्तम्पि चेतं –

''रत्तो खो, ब्राह्मण, रागेन अभिभूतो परियादिन्नचित्तो अत्तत्थम्पि यथाभूतं न पजानाति, परत्थम्पि यथाभूतं न पजानाति, उभयत्थम्पि यथाभूतं न पजानाती''तिआदि (अ॰ नि॰ ३.५५)।

अन्धतमन्ति अन्धभावकरं तमं। **य**न्ति यत्थ। भुम्मत्थे हि एतं पच्चत्तवचनं। यस्मिं काले लोभो सहते अभिभवति नरं, अन्धतमं तदा होतीति। **य**न्ति वा कारणवचनं। यस्मा लोभो उप्पज्जमानो नरं सहते अभिभवति, तस्मा अन्धतमं तदा होतीति योजना, य-त-सद्दानं एकन्तसम्बन्धभावतो। अथ वा **य**न्ति किरियापरामसनं, ''लोभो सहते''ति एत्थ यदेतं लोभस्स सहनं अभिभवनं वुत्तं। एतं अन्धभावकरस्स तमस्स गमनं उप्पादोति अत्थो। अथ वा यं नरं लोभो सहते अभिभवति, तस्स अन्धतमं तदा होति, ततो च लुद्धो अत्थं न जानाति, लुद्धो धम्मं न पस्सतीति एवमेत्थ अत्थो दट्ठब्बो।

यो च लोभं पहन्त्वानाति यो पुब्बभागे तदङ्गवसेन विक्खम्भनवसेन च यथारहं समथविपस्सनाहि लोभं पजहित्वा तथा पजहनहेतु **लोभनेय्ये** दिब्बेपि रूपादिके उपट्ठिते **न लुब्भति,** बलवविपस्सनानुभावेन **लोभो पहीयते तम्हा**ति तस्मा अरियपुग्गला अरियमग्गेन लोभो पहीयति पजहीयति, अच्चन्तमेव परिच्चजीयति। यथा किं? **उदबिन्दूव पोक्खरा**ति पदुमिनिपण्णतो उदकबिन्दु विय। सेसगाथानम्पि इमिना नयेन अत्थो वेदितब्बो।

तथा दोसस्स –

''यदपि दुट्ठो अभिसङ्खरोति कायेन वाचाय मनसा तदपि अकुसलं; यदपि दुट्ठो दोसेन अभिभूतो परियादिन्नचित्तो परस्स असता दुक्खं उप्पादेति वधेन वा बन्धेन वा जानिया वा गरहाय वा पब्बाजनाय वा बलवम्हि बलत्थो इति, तदपि अकुसलं। इतिस्समे दोसजा दोसनिदाना दोससमुदया दोसपच्चया अनेके पापका अकुसला धम्मा सम्भवन्ती''ति (अ० नि० ३.७०)।

तथा –

''दुट्ठो खो, ब्राह्मण, दोसेन अभिभूतो परियादिन्नचित्तो अत्तब्याबाधायपि चेतेति, परब्याबाधायपि चेतेति, उभयब्याबाधायपि चेतेति चेतसिकम्पि दुक्खं दोमनस्सं पटिसंवेदेती''ति (अ० नि० ३.५५)।

तथा –

''दुट्ठो खो, ब्राह्मण, दोसेन अभिभूतो परियादिन्नचित्तो अत्तत्थम्पि यथाभूतं न पजानाति, परत्थम्पि यथाभूतं न पजानाति, उभयत्थम्पि यथा भूतं न पजानाती''ति (अ० नि० ३.५५) –

आदिसुत्तपदानुसारेन अनत्थजननता अत्थहानिहेतुता च वेदितब्बा।

तथा मोहस्स ''यदपि मूळ्हो अभिसङ्खरोति कायेन वाचाय मनसा''तिआदिना (अ० नि० ३.७०), ''मूळ्हो खो, ब्राह्मण, मोहेन अभिभूतो परियादिन्नचित्तो अत्तब्याबाधायपि चेतेती''तिआदिना(अ० नि० ३.५५), ''अत्तत्थम्पि यथाभूतं न पजानाती''तिआदिना (अ० नि० ३.५५) च आगतसुत्तपदानुसारेन वेदितब्बा।

तालपक्कंव बन्धनाति तालफलं विय उसुमुप्पादेन वण्टतो, ततियमग्गञाणुप्पादेन तस्स चित्ततो दोसो पहीयति, परिच्चजीयतीति अत्थो। **मोहं विहन्ति सो सब्ब**न्ति सो अरियपुग्गलो सब्बं अनवसेसं मोहं चतुत्थमग्गेन विहन्ति विधमति समुच्छिन्दति। **आदिच्चोवुदयं तम**न्ति आदिच्चो विय उदयं उग्गच्छन्तो तमं अन्धकारं।

नवमसुत्तवण्णना निट्ठिता।

१०. देवदत्तसुत्तवण्णना

८९. दसमे **तीहि, भिक्खवे, असद्धम्मेहि अभिभूतो**ति का उप्पत्ति? देवदत्ते हि अवीचिमहानिरयं पविट्ठे देवदत्तपक्खिया अञ्ञतित्थिया च ''समणेन गोतमेन अभिसपितो देवदत्तो पथविं पविट्ठो''ति अब्भाचिक्खिंसु। तं सुत्वा सासने अनभिप्पसन्ना मनुस्सा ''सिया नु खो एतदेवं, यथा इमे भणन्ती''ति आसङ्कं उप्पादेसुं। तं पवत्तिं भिक्खू भगवतो आरोचेसुं। अथ भगवा ''न, भिक्खवे, तथागता कस्सचि अभिसपं देन्ति, तस्मा न देवदत्तो मया अभिसपितो, अत्तनो कम्मेनेव निरयं पविट्ठो''ति वत्वा तेसं मिच्छागाहं पटिसेधेन्तो इमाय अट्ठुप्पत्तिया इदं सुत्तं अभासि।

तत्थ **असद्धम्मेही**ति असतं धम्मेहि, असन्तेहि वा धम्मेहि। **अतेकिच्छो**ति बुद्धेहिपि अनिवत्तनीयत्ता अवीचिनिब्बत्तिया तिकिच्छाभावतो अतेकिच्छो, अतिकिच्छनीयोति अत्थो। असन्तगुणसम्भावनाधिप्पायेन पवत्ता पापा

इच्छा एतस्साति पापिच्छो, तस्स भावो **पापिच्छता**, ताय। ''अहं बुद्धो भविस्सामि, सङ्घं परिहरिस्सामी''ति तस्स इच्छा उप्पन्ना। कोकालिकादयो पापा लामका मित्ता एतस्साति पापमित्तो, तस्स भावो **पापमित्तता,** ताय। **उत्तरिकरणीये**ति झानाभिञ्ञाहि उत्तरिकरणीये अधिगन्तब्बे मग्गफले अनधिगते सति एव, तं अनधिगन्त्वाति अत्थो। **ओरमत्तकेना**ति अप्पमत्तकेन झानाभिञ्ञामत्तेन। **विसेसाधिगमेना**ति उत्तरिमनुस्सधम्माधिगमेन। **अन्तरा**ति वेमज्झे। **वोसानं आपादी**ति अकतकिच्चोव समानो ''कतकिच्चोम्ही''ति मञ्ञमानो समणधम्मतो विगमं आपज्जि। इति भगवा इमिना सुत्तेन विसेसतो पुथुज्जनभावे आदीनवं पकासेसि भारियो पुथुज्जनभावो, यत्र हि नाम झानाभिञ्ञापरियोसाना सम्पत्तियो निब्बत्तेत्वापि अनेकानत्थावहं नानाविधं दुक्खहेतुं असन्तगुणसम्भावनं असप्पुरिससंसग्गं आलसियानुयोगञ्च अविजहन्तो अवीचिम्हि कप्पट्ठियं अतेकिच्छं किब्बिसं पसविस्सतीति।

गाथासु **मा**ति पटिसेधे निपातो। **जातू**ति एकंसेन। **कोची**ति सब्बसङ्गाहकवचनं। **लोकस्मि**न्ति सत्तलोके। इदं वुत्तं होति ''इमस्मिं सत्तलोके कोचि पुग्गलो एकंसेन पापिच्छो मा होतू''ति। **तदमिनापि जानाथ, पापिच्छानं यथा गती**ति पापिच्छानं पुग्गलानं यथा गति यादिसी निप्फत्ति, यादिसो अभिसम्परायो, तं इमिनापि कारणेन जानाथाति देवदत्तं निदस्सेन्तो एवमाह। **पण्डितोति समञ्ञातो**ति परियत्तिबाहुसच्चेन पण्डितोति ञातो। **भावितत्तोति सम्मतो**ति झानाभिञ्ञाहि भावितचित्तोति सम्भावितो। तथा हि सो पुब्बे ''महिद्धिको गोधिपुत्तो, महानुभावो गोधिपुत्तो''ति धम्मसेनापतिनापि पसंसितो अहोसि। **जलंव यससा अट्ठा, देवदत्तोति विस्सुतो**ति अत्तनो कित्तिया परिवारेन जलन्तो विय ओभासेन्तो विय ठितो देवदत्तोति एवं विस्सुतो पाकटो अहोसि। **''मे सुत्त''**न्तिपि पाठो, मया सुतं सुतमत्तं, कतिपाहेनेव अतथाभूतत्ता तस्स तं पण्डिच्चादि सवनमत्तमेवाति अत्थो।

सो समानमनुचिण्णो, आसज्ज नं तथागतन्ति सो एवंभूतो देवदत्तो ''बुद्धोपि सक्यपुत्तो, अहम्पि सक्यपुत्तो, बुद्धोपि समणो, अहम्पि समणो, बुद्धोपि इद्धिमा, अहम्पि इद्धिमा, बुद्धोपि दिब्बचक्खुको, अहम्पि दिब्बचक्खुको, बुद्धोपि दिब्बसोतको, अहम्पि दिब्बसोतको, बुद्धोपि चेतोपरियञाणलाभी, अहम्पि चेतोपरियञाणलाभी, बुद्धोपि अतीतानागतपच्चुप्पन्ने धम्मे जानाति, अहम्पि ते जानामी''ति अत्तनो पमाणं अजानित्वा सम्मासम्बुद्धं अत्तना समसमट्ठपनेन समानं आपज्जन्तो ''इदानाहं बुद्धो भविस्सामि, भिक्खुसङ्घं परिहरिस्सामी''ति अभिमारपयोजना तथागतं आसज्ज आसादेत्वा विहेठेत्वा। ''पमादमनुजीनो''तिपि पठन्ति। तस्सत्थो ''वुत्तनयेन पमादं आपज्जन्तो पमादं निस्साय भगवता सद्धिं युगग्गाहचित्तुप्पादेन सहेव झानाभिञ्ञाहि अनुजीनो परिहीनो''ति। **अवीचिनिरयं पत्तो, चतुद्वारं भयानक**न्ति जालानं तत्थ उप्पन्नसत्तानं वा निरन्तरताय ''अवीची''ति लद्धनामं चतूसु पस्सेसु चतुमहाद्वारयोगेन चतुद्वारं अतिभयानकं महानिरयं पटिसन्धिग्गहणवसेन पत्तो। तथा हि वुत्तं –

> ''चतुक्कण्णो चतुद्वारो, विभत्तो भागसो मितो।
> अयोपाकारपरियन्तो, अयसा पटिकुज्जितो॥
>
> ''तस्स अयोमया भूमि, जलिता तेजसा युता।
> समन्ता योजनसतं, फरित्वा तिट्ठति सब्बदा''ति॥ (म॰ नि॰ ३.२५०; अ॰ नि॰ ३.३६; पे॰ व॰ ६९३-६९४; जा॰ २.१९.८६-८७)।

अदुट्ठस्साति अदुट्ठचित्तस्स। **दुब्भे**ति दूसेय्य। **तमेव पापं फुसती**ति तमेव अदुट्ठदुब्भिं पापपुग्गलं पापं निहीनं पापफलं फुसति पापुणाति अभिभवति। **भेस्मा**ति विपुलभावेन गम्भीरभावेन च भिंसापेन्तो विय, विपुलगम्भीरोति अत्थो। **वादेना**ति

दोसेन। **विहिंसती**ति बाधति आसादेति। **वादो तम्हि न रूहती**ति तस्मिं तथागते परेन आरोपियमानो दोसो न रुहति, न तिट्ठति, विसकुम्भो विय समुद्दस्स, न तस्स विकारं जनेतीति अत्थो।

एवं छहि गाथाहि पापिच्छतादिसमन्नागतस्स निरयूपगभावदस्सनेन दुक्खतो अपरिमुत्ततं दस्सेत्वा इदानि तप्पटिपक्खधम्मसमन्नागतस्स दुक्खक्खयं दस्सेन्तो ''**तादिसं मित्त**''न्ति ओसानगाथमाह। तस्सत्थो – **यस्स** सम्मा पटिपन्नस्स **मग्गानुगो** पटिपत्तिमग्गं अनुगतो सम्मा पटिपन्नो अप्पिच्छतादिगुणसमन्नागमेन सकलवट्टदुक्खस्स **खयं** परियोसानं पापुणेय्य। तादिसं बुद्धं वा बुद्धसावकं वा **पण्डितो** सप्पञ्ञो, अत्तनो **मित्तं कुब्बेथ** तेन मेत्तिकं करेय्य, **तञ्च सेवेय्य** तमेव पयिरुपासेय्याति।

इति इमस्मिं वग्गे छट्ठसत्तमसुत्तेसु विवट्टं कथितं, इतरेसु वट्टविवट्टं कथितं।

दसमसुत्तवण्णना निट्ठिता।

चतुत्थवग्गवण्णना निट्ठिता।

५. पञ्चमवग्गो

१. अग्गप्पसादसुत्तवण्णना

९०. पञ्चमवग्गस्स पठमे **अग्गप्पसादा**ति एत्थ अयं **अग्ग**सद्दो आदिकोटिकोट्ठाससेट्ठेसु दिस्सति। तथा हेस ''अज्जतग्गे, सम्म दोवारिक, आवरामि द्वारं निगण्ठानं निगण्ठीनं (म॰ नि॰ २.७०)। अज्जतग्गे पाणुपेतं सरणं गत''न्ति (दी॰ नि॰ १.२५०; पारा॰ १५) च आदीसु आदिम्हि दिस्सति। ''तेनेव अङ्गुलग्गेन तं अङ्गुलग्गं परामसेय्य (कथा॰ ४४१)। उच्छग्गं वेळग्ग''न्ति च आदीसु कोटियं। ''अम्बिलग्गं वा मधुरग्गं वा तित्तकग्गं वा (सं॰ नि॰ ५.३७४)। अनुजानामि, भिक्खवे, विहारग्गेन वा परिवेणग्गेन वा भाजेतु''न्ति (चूळव॰ ३१८) च आदीसु कोट्ठासे। ''अयं इमेसं चतुन्नं पुग्गलानं अग्गो च सेट्ठो च उत्तमो च पवरो च (अ॰ नि॰ ४.९५)। अग्गोहमस्मि लोकस्सा''ति च आदीसु (दी॰ नि॰ २.३१; म॰ नि॰ ३.२०७) सेट्ठे। स्वायमिधापि सेट्ठेयेव दट्ठब्बो। तस्मा अग्गेसु सेट्ठेसु पसादा, अग्गभूता सेट्ठभूता वा पसादा अग्गप्पसादाति अत्थो।

पुरिमस्मिञ्च अत्थे अग्गसद्देन बुद्धादिरतनत्तयं वुच्चति। तेसु भगवा ताव असदिसट्ठेन, गुणविसिट्ठट्ठेन, असमसमट्ठेन च अग्गो। सो हि महाभिनीहारं दसन्नं पारमीनं पविचयञ्च आदिं कत्वा तेहि बोधिसम्भारगुणेहि चेव बुद्धगुणेहि च सेसजनेहि असदिसोति असदिसट्ठेन अग्गो। ये चस्स गुणा महाकरुणादयो, ते सेससत्तानं गुणेहि विसिट्ठाति गुणविसिट्ठट्ठेनपि सब्बसत्तुत्तमताय अग्गो। ये पन पुरिमका सम्मासम्बुद्धा सब्बसत्तेहि असमा, तेहि सद्धिं अयमेव रूपकायगुणेहि चेव धम्मकायगुणेहि च समोति असमसमट्ठेनपि अग्गो। तथा दुल्लभपातुभावतो अच्छरियमनुस्सभावतो बहुजनहितसुखावहतो अदुतियअसहायादिभावतो च भगवा लोके अग्गोति वुच्चति। यथाह –

> ''एकपुग्गलस्स, भिक्खवे, पातुभावो दुल्लभो लोकस्मिं, कतमस्स एकपुग्गलस्स? तथागतस्स अरहतो सम्मासम्बुद्धस्स।

''एकपुग्गलो, भिक्खवे, लोके उप्पज्जमानो उप्पज्जति अच्छरियमनुस्सो।

''एकपुग्गलो, भिक्खवे, लोके उप्पज्जमानो उप्पज्जति बहुजन...पे०... सम्मासम्बुद्धो।

''एकपुग्गलो, भिक्खवे, लोके उप्पज्जमानो उप्पज्जति, अदुतियो असहायो अप्पटिमो अप्पटिसमो अप्पटिभागो अप्पटिपुग्गलो असमो असमसमो द्विपदानं अग्गो। कतमो एकपुग्गलो? तथागतो अरहं सम्मासम्बुद्धो''ति (अ० नि० १.१७०-१७२, १७४)।

धम्मसङ्घापि अञ्ञधम्मसङ्घेहि असदिसट्ठेन विसिट्ठगुणताय दुल्लभपातुभावादिना च अग्गा। तथा हि तेसं स्वाक्खाततादिसुप्पटिपन्नतादिगुणविसेसेहि अञ्ञधम्मसङ्घा सदिसा अप्पतरनिहीना वा नत्थि, कुतो सेट्ठा। सयमेव च पन तेहि विसिट्ठगुणताय सेट्ठा। तथा दुल्लभुप्पादअच्छरियभावबहुजनहितसुखावहा अदुतियअसहायादिसभावा च ते। यदग्गेन हि भगवा दुल्लभपातुभावो, तदग्गेन धम्मसङ्घापीति। अच्छरियादिभावेपि एसेव नयो। एवं अग्गेसु सेट्ठेसु उत्तमेसु पवरेसु गुणविसिट्ठेसु पसादाति **अग्गप्पसादा**।

दुतियस्मिं पन अत्थे यथावुत्तेसु अग्गेसु बुद्धादीसु उप्पत्तिया अग्गभूता पसादा अग्गप्पसादा। ये पन अरियमग्गेन आगता अवेच्चप्पसादा, ते एकन्तेनेव अग्गभूता पसादाति अग्गप्पसादा। यथाह ''इध, भिक्खवे, अरियसावको बुद्धे अवेच्चप्पसादेन समन्नागतो होती''तिआदि (सं० नि० ५.१०२७)। अग्गविपाकत्तापि चेते अग्गप्पसादा। वुत्तञ्हि ''अग्गे खो पन पसन्नानं अग्गो विपाको''ति।

यावताति यत्तका। **सत्ता**ति पाणिनो। **अपदा**ति अपादका। **द्विपदा**ति द्विपादका। सेसपदद्वयेपि एसेव नयो। वा-सद्दो समुच्चयत्थो, न विकप्पत्थो। यथा ''अनुप्पन्नो वा कामासवो उप्पज्जति, उप्पन्नो वा कामासवो पवड्ढती''ति (म० नि० १.१७) एत्थ अनुप्पन्नो च उप्पन्नो चाति अत्थो। यथा च ''भूतानं वा सत्तानं ठितिया सम्भवेसीनं वा अनुग्गहाया''ति (म० नि० १.४०२; सं० नि० २.१२) एत्थ भूतानञ्च सम्भवेसीनञ्चाति अत्थो। यथा च ''अग्गितो वा उदकतो वा मिथुभेदतो वा''ति (दी० नि० २.१५२; उदा० ७६; महाव० २८६) एत्थ अग्गितो च उदकतो च मिथुभेदतो चाति अत्थो, एवं ''अपदा वा...पे०... अग्गमक्खायती''ति एत्थापि अपदा च द्विपदा चाति सम्पिण्डनवसेन अत्थो दट्ठब्बो। तेन वुत्तं ''वा-सद्दो समुच्चयत्थो, न विकप्पत्थो''ति।

रूपिनोति रूपवन्तो। न रूपिनोति **अरूपिनो। सञ्ञिनो**ति सञ्ञावन्तो। न सञ्ञिनोति **असञ्ञिनो। नेवसञ्ञिनासञ्ञिनो** नाम भवग्गपरियापन्ना। एत्तावता च कामभवो, रूपभवो, अरूपभवो, एकवोकारभवो, चतुवोकारभवो, पञ्चवोकारभवो, सञ्ञीभवो, असञ्ञीभवो, नेवसञ्ञीनासञ्ञीभवोति नवविधेपि भवे सत्ते अनवसेसतो परियादियित्वा दस्सेसि धम्मराजा। एत्थ हि रूपिग्गहणेन कामभवो रूपभवो पञ्चवोकारभवो एकवोकारभवो च दस्सितो, अरूपिग्गहणेन अरूपभवो चतुवोकारभवो च दस्सितो। सञ्ञीभवादयो पन सरूपेनेव दस्सिता। अपदादिग्गहणेन कामभवपञ्चवोकारभवसञ्ञीभवानं एकदेसो दस्सितोति।

कस्मा पनेत्थ यथा अदुतियसुत्ते ''द्विपदानं अग्गो''ति द्विपदानं गहणमेव अकत्वा अपदादिग्गहणं कतन्ति? वुच्चते — अदुतियसुत्ते ताव सेट्ठतरवसेन द्विपदग्गहणमेव कतं। इमस्मिञ्हि लोके सेट्ठो नाम उप्पज्जमानो अपदचतुप्पदबहुप्पदेसु न उप्पज्जति, द्विपदेसुयेव उप्पज्जति। कतरेसु द्विपदेसु? मनुस्सेसु चेव देवेसु च। मनुस्सेसु उप्पज्जमानो सकललोकं वसे

वत्तेतुं समत्थो बुद्धो हुत्वा उप्पज्जति। अङ्गुत्तरट्ठकथायं पन ''तिसहस्सिमहासहस्सिलोकधातुं वसे वत्तेतुं समत्थो''ति (अ॰ नि॰ अट्ठ॰ १.१.१७४) वुत्तं। देवेसु उप्पज्जमानो दससहस्सिलोकधातुं वसे वत्तनको महाब्रह्मा हुत्वा उप्पज्जति, सो तस्स कप्पियकारको वा आरामिको वा सम्पज्जति। इति ततोपि सेट्ठतरवसेनेस ''द्विपदानं अग्गो''ति तत्थ वुत्तो, इध पन अनवसेसपरियादानवसेन एवं वुत्तं। यावत्तका हि सत्ता अत्तभावपरियापन्ना अपदा वा…पे॰… नेवसञ्ञीनासञ्ञिनो वा, तथागतो तेसं अग्गमक्खायतीति। निद्धारणे चेतं सामिवचनं, मकारो पदसन्धिकरो। अग्गो अक्खायतीति पदविभागो।

अग्गो विपाको होतीति अग्गे सम्मासम्बुद्धे पसन्नानं यो पसादो, सो अग्गो सेट्ठो उत्तमो कोटिभूतो वा, तस्मा तस्स विपाकोपि अग्गो सेट्ठो उत्तमो कोटिभूतो उळारतमो पणीततमो होति। सो पन पसादो दुविधो लोकियलोकुत्तरभेदतो। तेसु लोकियस्स ताव –

''ये केचि बुद्धं सरणं गतासे, न ते गमिस्सन्ति अपायभूमिं।
पहाय मानुसं देहं, देवकायं परिपूरेस्सन्ति॥ (दी॰ नि॰ २.३३२; सं॰ नि॰ १.३७)।

''बुद्धोति कित्तयन्तस्स, काये भवति या पीति।
वरमेव हि सा पीति, कसिणेनपि जम्बुदीपस्स॥

''सतं हत्थी सतं अस्सा, सतं अस्सतरी रथा।
सतं कञ्ञासहस्सानि, आमुक्कमणिकुण्डला।
एकस्स पदवीतिहारस्स, कलं नाग्घन्ति सोळसिं''॥ (सं॰ नि॰ १.२४२; चूळव॰ ३०५)।

''साधु खो, देवानमिन्द, बुद्धं सरणगमनं होति, बुद्धं सरणगमनहेतु खो, देवानमिन्द, एवमिधेकच्चे सत्ता कायस्स भेदा परं मरणा सुगतिं सग्गं लोकं उपपज्जन्ति। ते अञ्ञे देवे दसहि ठानेहि अधिगण्हन्ति – दिब्बेन आयुना, दिब्बेन वण्णेन, दिब्बेन सुखेन, दिब्बेन यसेन, दिब्बेन आधिपतेय्येन, दिब्बेहि रूपेहि, दिब्बेहि सद्देहि, दिब्बेहि गन्धेहि, दिब्बेहि रसेहि, दिब्बेहि फोट्ठब्बेही''ति (सं॰ नि॰ ४.३४१) –

एवमादीनं सुत्तपदानं वसेन पसादस्स फलविसेसयोगो वेदितब्बो। तस्मा सो अपायदुक्खविनिवत्तनेन सद्धिं सम्पत्तिभवेसु सुखविपाकदायकोति दट्ठब्बो। लोकुत्तरो पन सामञ्ञफलविपाकदायको वट्टदुक्खविनिवत्तको च। सब्बोपि चायं पसादो परम्पराय वट्टदुक्खं विनिवत्तेतियेव। वुत्तञ्हेतं –

''यस्मिं, भिक्खवे, समये अरियसावको अत्तनो सद्धं अनुस्सरति, नेवस्स तस्मिं समये रागपरियुट्ठितं चित्तं होति, न दोसपरियुट्ठितं, न मोहपरियुट्ठितं चित्तं होति, उजुगतमेवस्स तस्मिं समये चित्तं होति। उजुगतचित्तस्स पामोज्जं जायति, पमुदितस्स पीति जायति…पे॰… नापरं इत्थत्तायाति पजानाती''ति (अ॰ नि॰ ६.१०; २६)।

धम्माति सभावधम्मा। **सङ्खता**ति समेच्च सम्भुय्य पच्चयेहि कताति सङ्खता, सप्पच्चयधम्मा। हेतूहि पच्चयेहि च न केहिचि कताति **असङ्खता**, अप्पच्चयनिब्बानं। सङ्खतानं पटियोगिभावेन ''असङ्खता''ति पुथुवचनं। **विरागो तेसं अग्गमक्खायती**ति तेसं सङ्खतासङ्खतधम्मानं यो विरागसङ्खातो असङ्खतधम्मो, सो सभावेनेव सण्हसुखुमभावतो सन्ततरपणीततरभावतो गम्भीरादिभावतो मदनिम्मदनादिभावतो च अग्गं सेट्ठं उत्तमं पवरन्ति वुच्चति। **यदिदन्**ति निपातो,

यो अयन्ति अत्थो। **मदनिम्मदनो**तिआदीनि सब्बानि निब्बानवेवचनानियेव। तथा हि तं आगम्म मानमदपुरिसमदादिको सब्बो मदो निम्मदीयति पमद्दीयति, कामपिपासादिका सब्बा पिपासा विनीयति, कामालयादिका सब्बेपि आलया समुग्घातीयन्ति, सब्बेपि कम्मवट्टकिलेसवट्टविपाकवट्टा उपच्छिज्जन्ति, अट्ठसतभेदा सब्बापि तण्हा खीयति, सब्बेपि किलेसा विरज्जन्ति, सब्बं दुक्खं निरुज्झति, तस्मा मदनिम्मदनो...पे॰... निरोधोति वुच्चति। या पनेसा तण्हा भवेन भवं, फलेन कम्मं विनति संसिब्बतीति कत्वा वानन्ति वुच्चति। तं वानं एत्थ नत्थि, एतस्मिं वा अधिगते अरियपुग्गलस्स न होतीति **निब्बानं**।

अग्गो विपाको होतीति एत्थापि –

''ये केचि धम्मं सरणं गतासे...पे॰...॥ (दी॰ नि॰ २.३३२; सं॰ नि॰ १.३७)।

''धम्मोति कित्तयन्तस्स, काये भवति या पीति...पे॰...॥

''साधु खो, देवानमिन्द, धम्मं सरणगमनं होति। धम्मं सरणगमनहेतु खो, देवानमिन्द, एवमिधेकच्चे...पे॰... दिब्बेहि फोट्ठब्बेही''ति (सं॰ नि॰ ४.३४१) –

एवमादीनं सुत्तपदानं वसेन धम्मे पसादस्स फलविसेसयोगो वेदितब्बो। एवमेत्थ असङ्खतधम्मवसेनेव अग्गभावो आगतो, सब्बसङ्खतनिस्सरणदस्सनत्थं अरियमग्गवसेनपि अयमत्थो लब्भतेव। वुत्तञ्हेतं –

''यावता, भिक्खवे, धम्मा सङ्खता, अरियो अट्ठङ्गिको मग्गो तेसं अग्गमक्खायती''ति (अ॰ नि॰ ४.३४)।

''मग्गानट्ठङ्गिको सेट्ठो''ति च। (ध॰ प॰ २७३)।

सङ्घा वा गणा वाति जनसमूहसङ्खाता यावता लोके सङ्घा वा गणा वा। **तथागतसावकसङ्घो**ति अट्ठअरियपुग्गलसमूहसङ्खातो दिट्ठिसीलसामञ्ञेन संहतो तथागतस्स सावकसङ्घो। **तेसं अग्गमक्खायती**ति अत्तनो सीलसमाधिपञ्ञाविमुत्तिआदिगुणविसेसेन तेसं सङ्घानं अग्गो सेट्ठो उत्तमो पवरोति वुच्चति। **यदिद**न्ति यानि इमानि। **चत्तारि पुरिसयुगानी**ति युगळवसेन पठममग्गट्ठो पठमफलट्ठोति इदमेकं युगळं, याव चतुत्थमग्गट्ठो चतुत्थफलट्ठोति इदमेकं युगळन्ति एवं चत्तारि पुरिसयुगानि। **अट्ठ पुरिसपुग्गला**ति पुरिसपुग्गलवसेन एको पठममग्गट्ठो एको पठमफलट्ठोति इमिना नयेन अट्ठ पुरिसपुग्गला। एत्थ च पुरिसोति वा पुग्गलोति वा एकत्थानि एतानि पदानि, वेनेय्यवसेन पनेवं वुत्तं। **एस भगवतो सावकसङ्घो**ति यानिमानि युगवसेन चत्तारि पुरिसयुगानि, पाटेक्कतो अट्ठ पुरिसपुग्गला, एस भगवतो सावकसङ्घो।

आहुनेय्योतिआदीसु आनेत्वा हुनितब्बन्ति आहुनं, दूरतोपि आगन्त्वा सीलवन्तेसु दातब्बन्ति अत्थो। चतुन्नं पच्चयानमेतं अधिवचनं। महप्फलभावकरणतो तं आहुनं पटिग्गहेतुं युत्तोति आहुनेय्यो। अथ वा दूरतोपि आगन्त्वा सब्बं सापतेय्यम्पि एत्थ हुनितब्बं, सक्कादीनम्पि आहवनं अरहतीति वा आहवनीयो। यो चायं ब्राह्मणानं आहवनीयो नाम अग्गि, यत्थ हुतं महप्फलन्ति तेसं लद्धि, सो चे हुतस्स महप्फलताय आहवनीयो, सङ्घोव आहवनीयो। सङ्घे हुतञ्हि महप्फलं होति। यथाह –

''यो च वस्ससतं जन्तु, अग्गिं परिचरे वने।
एकञ्च भावितत्तानं, मुहुत्तमपि पूजये।
सा एव पूजना सेय्यो, यञ्चे वस्ससतं हुत''न्ति॥ (ध॰ प॰ १०७)।

तयिदं निकायन्तरे ''आहवनीयो''ति पदं इध ''आहुनेय्यो''ति इमिना पदेन अत्थतो एकं, ब्यञ्जनतो पन किञ्चिमत्तमेव नानं, तस्मा एवमत्थवण्णना कता।

पाहुनेय्योति एत्थ पन पाहुनं वुच्चति दिसाविदिसतो आगतानं पियमनापानं ञातिमित्तानं अत्थाय सक्कारेन पटियत्तं आगन्तुकदानं, तम्पि ठपेत्वा ते तथारूपे पाहुनके सङ्घस्सेव दातुं युत्तं। तथा हेस एकबुद्धन्तरेपि दिस्सति अब्बोकिण्णञ्च। अयं पनेत्थ पदत्थो – ''पियमनापत्तकरेहि धम्मेहि समन्नागतो''ति एवं पाहुनमस्स दातुं युत्तं, पाहुनञ्च पटिग्गहेतुं युत्तोति पाहुनेय्यो। येसं पन पाहवनीयोति पाळि, तेसं यस्मा सङ्घो पुब्बकारं अरहति, तस्मा सङ्घो सब्बपठमं आनेत्वा एत्थ हुनितब्बन्ति पाहवनीयो, सब्बप्पकारेन वा आहवनं अरहतीति पाहवनीयो। स्वायमिध तेनेव अत्थेन पाहुनेय्योति वुच्चति।

''दक्खिणा''ति परलोकं सद्दहित्वा दातब्बदानं, तं दक्खिणं अरहति दक्खिणाय वा हितो महप्फलभावकरणेन विसोधनतोति **दक्खिणेय्यो**। उभो हत्थे सिरसि पतिट्ठपेत्वा सब्बलोकेन करियमानं अञ्जलिकम्मं अरहतीति **अञ्जलिकरणीयो**। **अनुत्तरं पुञ्ञक्खेत्तं लोकस्सा**ति सब्बलोकस्स असदिसं पुञ्ञविरूहनट्ठानं। यथा हि रत्तसालीनं वा यवानं वा विरूहनट्ठानं ''रत्तसालिक्खेत्तं यवक्खेत्त''न्ति वुच्चति, एवं सङ्घो सदेवकस्स लोकस्स पुञ्ञविरूहनट्ठानं। सङ्घं निस्साय हि लोकस्स नानप्पकारहितसुखनिब्बत्तकानि पुञ्ञानि विरूहन्ति, तस्मा सङ्घो अनुत्तरं पुञ्ञक्खेत्तं लोकस्स। इधापि –

''ये केचि सङ्घं सरणं गतासे...पे॰...॥ (दी॰ नि॰ २.३३२; सं॰ नि॰ १.३७)।

''सङ्घोति कित्तयन्तस्स, काये भवति या पीति...पे॰...''॥

''साधु खो, देवानमिन्द, सङ्घं सरणगमनं होति, सङ्घं सरणगमनहेतु खो देवानमिन्द...पे॰... दिब्बेहि फोट्ठब्बेही''ति (सं॰ नि॰ ४.३४१) –

आदीनं सुत्तपदानं वसेन सङ्घे पसादस्स फलविसेसयोगो, तेनस्स अग्गता अग्गविपाकता च वेदितब्बा। तथा अनुत्तरियपटिलाभो सत्तमभवादितो पट्ठाय वट्टदुक्खसमुच्छेदो अनुत्तरसुखाधिगमोति एवमादिउळारफलनिप्फादनवसेन अग्गविपाकता वेदितब्बा।

गाथासु **अग्गतो**ति अग्गे रतनत्तये, अग्गभावतो वा पसन्नानं। **अग्गं धम्म**न्ति अग्गसभावं बुद्धसुबुद्धतं धम्मसुधम्मतं सङ्घसुप्पटिपत्तिं रतनत्तयस्स अनञ्ञसाधारणं उत्तमसभावं, दसबलादिस्वाक्खाततादिसुप्पटिपन्नतादिगुणसभावं वा **विजानतं** विजानन्तानं। एवं साधारणतो अग्गप्पसादवत्थुं दस्सेत्वा इदानि असाधारणतो तं विभागेन दस्सेतुं **''अग्गे बुद्धे''**तिआदि वुत्तं। तत्थ **पसन्नान**न्ति अवेच्चप्पसादेन इतरप्पसादेन च पसन्नानं अधिमुत्तानं। **विरागूपसमे**ति विरागे उपसमे च, सब्बस्स रागस्स सब्बेसं किलेसानं अच्चन्तविरागहेतुभूते अच्चन्तउपसमहेतुभूते चाति अत्थो। **सुखे**ति वट्टदुक्खक्खयभावेन सङ्खारूपसमसुखभावेन च सुखे।

अग्गस्मिं दानं ददतन्ति अग्गे रतनत्तये दानं देन्तानं देय्यधम्मं परिच्चजन्तानं। तत्थ धरमानं भगवन्तं चतूहि पच्चयेहि उपट्ठहन्ता पूजेन्ता सक्करोन्ता परिनिब्बुतञ्च भगवन्तं उद्दिस्स धातुचेतियादिके उपट्ठहन्ता पूजेन्ता सक्करोन्ता बुद्धे दानं ददन्ति नाम। ''धम्मं पूजेस्सामा''ति धम्मधरे पुग्गले चतूहि पच्चयेहि उपट्ठहन्ता पूजेन्ता सक्करोन्ता धम्मञ्च चिरट्ठितिकं करोन्ता धम्मे दानं ददन्ति नाम। तथा अरियसङ्घं चतूहि पच्चयेहि उपट्ठहन्ता पूजेन्ता सक्करोन्ता तं उद्दिस्स इतरस्मिम्पि तथा पटिपज्जन्ता सङ्घे दानं ददन्ति नाम। **अग्गं पुञ्ञं पवड्ढती**ति एवं रतनत्तये पसन्नेन चेतसा उळारं परिच्चागं उळारञ्च पूजासक्कारं पवत्तेन्तानं दिवसे दिवसे अग्गं उळारं कुसलं उपचीयति। इदानि तस्स पुञ्ञस्स अग्गविपाकताय अग्गभावं दस्सेतुं **''अग्गं आयू''**तिआदि वुत्तं। तत्थ **अग्गं आयू**ति दिब्बं वा मानुसं वा अग्गं उळारतमं आयु। **पवड्ढती**ति उपरूपरि ब्रूहति। **वण्णो**ति रूपसम्पदा। **यसो**ति परिवारसम्पदा। **कित्ती**ति थुतिघोसो। **सुख**न्ति कायिकं चेतसिकञ्च सुखं। **बल**न्ति कायबलं ञाणबलञ्च।

अग्गस्स दाताति अग्गस्स रतनत्तयस्स दाता, अथ वा अग्गस्स देय्यधम्मस्स दानं उळारं कत्वा तत्थ पुञ्ञं पवत्तेता। **अग्गधम्मसमाहितो**ति अग्गेन पसादधम्मेन दानादिधम्मेन च समाहितो समन्नागतो अचलप्पसादयुत्तो, तस्स वा विपाकभूतेहि बहुजनस्स पियमनापतादिधम्मेहि युत्तो। **अग्गप्पत्तो पमोदती**ति यत्थ यत्थ सत्तनिकाये उप्पन्नो, तत्थ तत्थ अग्गभावं सेट्ठभावं अधिगतो, अग्गभावं वा लोकुत्तरमग्गफलं अधिगतो पमोदति अभिरमति परितुस्सतीति।

पठमसुत्तवण्णना निट्ठिता।

२. जीविकसुत्तवण्णना

९१. दुतियं अट्ठुप्पत्तिवसेन देसितं। एकस्मिञ्हि समये भगवति कपिलवत्थुस्मिं निग्रोधारामे विहरन्ते भिक्खू आगन्तुकभिक्खूनं सेनासनानि पञ्ञापेन्ता पत्तचीवरानि पटिसामेन्ता सामणेरा च लाभभाजनीयट्ठाने सम्पत्तसम्पत्तानं लाभं गण्हन्ता उच्चासद्दा महासद्दा अहेसुं। तं सुत्वा भगवा भिक्खू पणामेसि। ते किर सब्बेव नवा अधुनागता इमं धम्मविनयं। तं ञत्वा महाब्रह्मा आगन्त्वा ''अभिनन्दतु, भन्ते, भगवा भिक्खुसङ्घ''न्ति (म॰ नि॰ २.१५८) तेसं पणामितभिक्खूनं अनुग्गण्हनं याचि। भगवा तस्स ओकासं अकासि। अथ महाब्रह्मा ''कतावकासो खोम्हि भगवता''ति भगवन्तं अभिवादेत्वा पदक्खिणं कत्वा पक्कामि। अथ भगवा ''भिक्खुसङ्घो आगच्छतू''ति आनन्दत्थेरस्स आकारं दस्सेसि। अथ ते भिक्खू आनन्दत्थेरेन पक्कोसिता भगवन्तं उपसङ्कमित्वा सारज्जमानरूपा एकमन्तं निसीदिंसु। भगवा तेसं सप्पायदेसनं वीमंसन्तो ''इमे आमिसहेतु पणामिता, पिण्डियालोपधम्मदेसना नेसं सप्पाया''ति चिन्तेत्वा **''अन्तमिदं, भिक्खवे''**ति इमं देसनं देसेसि।

तत्रायं **अन्त**सद्दो ''सन्ति, भिक्खवे, एके समणब्राह्मणा पुब्बन्तकप्पिका पुब्बन्तानुदिट्ठिनो''तिआदीसु (दी॰ नि॰ १.२९) कोट्ठासे आगतो। ''अन्तमकासि दुक्खस्स, अन्तवा अयं लोको परिवटुमो''तिआदीसु (दी॰ नि॰ १.५५) परिच्छेदे। ''हरितन्तं वा पथन्तं वा सेलन्तं वा''तिआदीसु (म॰ नि॰ १.३०४) मरियादायं। ''अन्तं अन्तगुण''न्तिआदीसु (दी॰ नि॰ २.३७७; खु॰ पा॰ ३.द्वत्तिंसाकार) सरीरावयवे ''चरन्ति लोके परिवारछन्ना, अन्तो असुद्धा बहि सोभमाना''तिआदीसु (सं॰ नि॰ १.१२२; महानि॰ १९१) चित्ते। ''अप्पेकच्चानि उप्पलानि वा पदुमानि वा पुण्डरीकानि वा उदके जातानि उदके संवड्ढानि उदकानुग्गतानि अन्तो निमुग्गपोसीनी''तिआदीसु (दी॰ नि॰ २.६९; सं॰ नि॰ १.१७२; महाव॰ ९) अब्भन्तरे।

''मिगानं कोट्ठुको अन्तो, पक्खीनं पन वायसो।

एरण्डो अन्तो रुक्खानं, तयो अन्ता समागता''ति॥ (जा॰ १.३.१३५) –

आदीसु लामके। इधापि लामके एव दट्ठब्बो। तस्मा **अन्तमिदं भिक्खवे जीविकानन्ति** भिक्खवे इदं जीविकानं अन्तं पच्छिमं लामकं, सब्बनिहीनं जीवितन्ति अत्थो। **यदिदं पिण्डोल्यन्ति** यं इदं पिण्डपरियेसनेन भिक्खाचरियाय जीविकं कप्पेन्तस्स जीवितं। अयं पनेत्थ पदत्थो – पिण्डाय उलतीति पिण्डोलो, तस्स कम्मं पिण्डोल्यं, पिण्डपरियेसनेन जीविकाति अत्थो।

अभिसापोति अक्कोसो। कुपिता हि मनुस्सा अत्तनो पच्चत्थिकं ''पिलोतिकखण्डं निवासेत्वा कपालहत्थो पिण्डं परियेसमानो चरेय्यासी''ति अक्कोसन्ति। अथ वा ''किं तुय्हं अकातब्बं अत्थि, यो त्वं एवं बलवीरियूपपन्नोपि हिरोत्तप्पं पहाय कपणो पिण्डोलो विचरसि पत्तपाणी''ति एवम्पि अक्कोसन्तियेव। **तञ्च खो एतन्ति** तं एतं अभिसपम्पि समानं पिण्डोल्यं। **कुलपुत्ता उपेन्ति अत्थवसिकाति** मम सासने जातिकुलपुत्ता च आचारकुलपुत्ता च अत्थवसिका कारणवसिका हुत्वा कारणवसं पटिच्च उपेन्ति उपगच्छन्ति।

राजाभिनीतातिआदीसु ये रञ्ञो सन्तकं खादित्वा रञ्ञा बन्धनागारे बन्धापिता पलायित्वा पब्बजन्ति, ते रञ्ञा बन्धनं अभिनीतत्ता **राजाभिनीता** नाम। ये पन चोरेहि अटविं गहेत्वा एकच्चेसु मारियमानेसु एकच्चे ''मयं सामि तुम्हेहि विस्सट्ठा गेहं अनज्झावसित्वा पब्बजिस्साम, तत्थ तत्थ यं यं बुद्धपूजादिपुञ्ञं करिस्साम, ततो ततो तुम्हाकं पत्तिं दस्सामा''ति तेहि विस्सट्ठा पब्बजन्ति, ते **चोराभिनीता** नाम चोरेहि मारेतब्बतं अभिनीतत्ता। ये पन इणं गहेत्वा पटिदातुं असक्कोन्ता पलायित्वा पब्बजन्ति, ते **इणट्टा** नाम। तञ्च खो एतं पिण्डोल्यं कुलपुत्ता मम सासने नेव राजाभिनीता...पे॰... न आजीविकापकता उपेन्ति, अपिच खो ''ओतिण्णम्हा जातिया...पे॰... पञ्ञायेथा''ति उपेन्तीति पदसम्बन्धो।

तत्थ **ओतिण्णम्हाति** ओतिण्णा अम्हा। **जातियाति**आदीसु तम्हि तम्हि सत्तनिकाये खन्धानं पठमाभिनिब्बत्ति **जाति,** परिपाको **जरा,** भेदो **मरणं**। ञातिरोगभोगसीलदिट्ठिब्यसनेहि फुट्ठस्स सन्तापो अन्तो निज्झानं **सोको,** तेहि फुट्ठस्स वचीविप्पलापो **परिदेवो**। अनिट्ठफोट्ठब्बपटिहतकायस्स कायपीळनं **दुक्खं,** आघातवत्थूसु उपहतचित्तस्स चेतोपीळनं **दोमनस्सं**। ञातिब्यसनादीहि एव फुट्ठस्स परिदेवेनपि अधिवासेतुं असमत्थस्स चित्तसन्तापसमुट्ठितो भुसो आयासो **उपायासो**। एतेहि जातिआदीहि ओतिण्णा **दुक्खोतिण्णा,** तेहि जातिआदिदुक्खेहि अन्तो अनुपविट्ठा। **दुक्खपरेताति** तेहि दुक्खदुक्खवत्थूहि अभिभूता। जातिआदयो हि दुक्खस्स वत्थुभावतो दुक्खा, दुक्खभावतो च सोकपरिदेवदुक्खदोमनस्सुपायासा दुक्खाति। **अप्पेव नाम...पे॰... पञ्ञायेथाति** इमस्स सकलस्स वट्टदुक्खरासिस्स परिच्छेदकरणं ओसानकिरिया अपि नाम पञ्ञायेय्य।

सो च होति अभिज्झालूति इदं यो कुलपुत्तो ''दुक्खस्सन्तं करिस्सामी''ति पुब्बे चित्तं उप्पादेत्वा पब्बजितो अपरभागे तं पब्बज्जं तथारूपं कातुं न सक्कोति, तं दस्सेतुं वुत्तं। तत्थ **अभिज्झालूति** परभण्डानं अभिज्झायिता। **तिब्बसारागोति** बलवरागो। **ब्यापन्नचित्तोति** ब्यापादेन पूतिभूतत्ता विपन्नचित्तो। **पदुट्ठमनसङ्कप्पोति** तिखिणसिङ्गो विय चण्डगोणो परेसं उपघातवसेन दुट्ठचित्तो। **मुट्ठस्सतीति** भत्तनिक्खित्तकाको विय, मंसनिक्खित्तसुनखो विय च नट्ठस्सति, इध कतं एत्थ न सरति। **असम्पजानोति** निप्पञ्ञो खन्धादिपरिच्छेदरहितो। **असमाहितोति** चण्डसोते बद्धनावा विय असण्ठितो। **विब्भन्तचित्तोति** पन्थारुळ्हमिगो विय भन्तमनो। **पाकतिन्द्रियोति** यथा गिही संवराभावेन परिग्गहपरिजने ओलोकेन्ति असंवुतिन्द्रिया, एवं असंवुतिन्द्रियो होति।

छवालातन्ति छवानं दड्ढट्ठाने अलातं। **उभतोपदित्तं मज्झे गूथगत**न्ति पमाणेन अट्ठङ्गुलमत्तं उभतो द्वीसु कोटीसु आदित्तं मज्झे गूथमक्खितं। **नेव गामे**ति सचे हि तं युगनङ्गलगोपानसिपक्खपासकादीनं अत्थाय उपनेतुं सक्का अस्स गामे कट्ठत्थं फरेय्य। सचे खेत्तकुटिया कट्ठत्थरमञ्चकादीनं अत्थाय उपनेतुं सक्का अस्स, अरञ्ञे कट्ठत्थं फरेय्य। यस्मा पन उभयत्थापि न सक्का, तस्मा एवं वुत्तं। **तथूपमाह**न्ति तथूपमं छवालातसदिसं अहं इमं यथावुत्तपुग्गलं वदामि। **गिहिभोगा च परिहीनो**ति यो अगारे वसन्तेहि गिहीहि दायज्जे भाजियमाने अञ्ञथा च भोगो लद्धब्बो अस्स, ततो च परिहीनो। **सामञ्ञत्थञ्चा**ति आचरियुपज्झायानं ओवादे ठत्वा परियत्तिपटिवेधवसेन पत्तब्बं सामञ्ञत्थञ्च न परिपूरेति। इमं पन उपमं सत्था न दुस्सीलस्स वसेन आहरि, परिसुद्धसीलस्स पन अलसस्स अभिज्झादीहि दोसेहि दूसितचित्तस्स पुग्गलस्स वसेन आहरीति वेदितब्बं।

गाथासु **गिहिभोगा**ति कामसुखसम्भोगतो। **परिहीनो**ति जीनो। **सामञ्ञत्थ**न्ति पटिवेधबाहुसच्चञ्चेव परियत्तिबाहुसच्चञ्च। तादिसो हि असुतं सोतुं सुतं परियोदापेतुं न सक्कोति अलसभावतो। दुट्ठु भगोति **दुब्भगो,** अलक्खिको काळकण्णिपुरिसो। **परिधंसमानो**ति विनस्समानो। **पकिरेती**ति विकिरेति विद्धंसेति। सब्बमेतं भाविनो सामञ्ञत्थस्स अनुप्पादनमेव सन्धाय वुत्तं। **छवालातंव नस्सती**ति सो तादिसो पुग्गलो यथावुत्तं छवालातं विय कस्सचि अनुपयुज्जमानो एव नस्सति उभतो परिभट्ठभावतो। एवं ''कायवाचाहि अकतवीतिक्कमोपि चित्तं अविसोधेन्तो नस्सति, पगेव कतवीतिक्कमो दुस्सीलो''ति तस्स अपायदुक्खभागिभावदस्सनेन दुस्सीले आदीनवं दस्सेत्वा ततो सत्ते विवेचेतुकामो **''कासावकण्ठा''**तिआदिना गाथाद्वयमाह। तस्सत्थो हेट्ठा वुत्तो एव।

दुतियसुत्तवण्णना निट्ठिता।

३. सङ्घाटिकण्णसुत्तवण्णना

९२. ततिये **सङ्घाटिकण्णे**ति चीवरकोटियं। **गहेत्वा**ति परामसित्वा। **अनुबन्धो अस्सा**ति अनुगतो भवेय्य। इदं वुत्तं होति — ''भिक्खवे, इधेकच्चो भिक्खु अत्तनो हत्थेन मया पारुतस्स सुगतमहाचीवरस्स कण्णे परामसन्तो विय मं अनुगच्छेय्य, एवं मय्हं आसन्नतरो हुत्वा विहरेय्या''ति। **पादे पादं निक्खिपन्तो**ति गच्छन्तस्स मम पादे पादं निक्खित्तट्ठाने पादुद्धारणानन्तरं अत्तनो पादं निक्खिपन्तो। उभयेनापि ''ठानगमनादीसु अविजहन्तो सब्बकालं मय्हं समीपे एव विहरेय्य चेपी''ति दस्सेति। **सो आरकाव मय्हं, अहञ्च तस्सा**ति सो भिक्खु मया वुत्तं पटिपदं अपूरेन्तो मम दूरेयेव, अहञ्च तस्स दूरेयेव। एतेन मंसचक्खुना तथागतदस्सनं रूपकायसमोधानञ्च अकारणं, ञाणचक्खुनाव दस्सनं धम्मकायसमोधानमेव च पमाणन्ति दस्सेति। तेनेवाह ''धम्मञ्हि सो, भिक्खवे, भिक्खु न पस्सति, धम्मं अपस्सन्तो न मं पस्सती''ति। तत्थ धम्मो नाम नवविधो लोकुत्तरधम्मो। सो च अभिज्झादीहि दूसितचित्तेन न सक्का पस्सितुं, तस्मा धम्मस्स अदस्सनतो धम्मकायञ्च न पस्सतीति। तथा हि वुत्तं —

> ''किं ते, वक्कलि, इमिना पूतिकायेन दिट्ठेन? यो खो, वक्कलि, धम्मं पस्सति सो मं पस्सति; यो मं पस्सति, सो धम्मं पस्सती''ति (सं॰ नि॰ ३.८७)।
>
> ''धम्मभूतो ब्रह्मभूतो''ति (म॰ नि॰ १.२०३; पटि॰ म॰ ३.५) च।
>
> ''धम्मकायो इतिपि, ब्रह्मकायो इतिपी''ति (दी॰ नि॰ ३.११८) च आदि।

योजनसतेति योजनसते पदेसे, योजनसतमत्थकेति अत्थो। सेसं वुत्तविपरियायेन वेदितब्बं। अरियमग्गाधिगमवसेन चस्स अनभिज्झालुआदिभावो दट्ठब्बो।

गाथासु **महिच्छो**ति कामेसु तिब्बसारागताय महाइच्छो। **विघातवा**ति पदुट्ठमनसङ्कप्पताय सत्तेसु आघातवसेन महिच्छताय इच्छितालाभेन च विघातवा। **एजानुगो**ति एजासङ्खाताय तण्हाय दासो विय हुत्वा तं अनुगच्छन्तो। रागादिकिलेसपरिळाहाभिभवेन **अनिब्बुतो**। रूपादिविसयानं अभिकङ्खनेन **गिद्धो। पस्स यावञ्च आरका**ति अनेजस्स निब्बुतस्स वीतगेधस्स सम्मासम्बुद्धस्स ओकासवसेन समीपेपि समानो महिच्छो विघातवा एजानुगो अनिब्बुतो गिद्धो बालपुथुज्जनो धम्मसभावतो यत्तकं दूरे, तस्स सो दूरभावो पस्स, वत्तुम्पि न सुकरन्ति अत्थो। वुत्तञ्हेतं –

''नभञ्च दूरे पथवी च दूरे,
पारं समुद्दस्स तथाहु दूरे।
ततो हवे दूरतरं वदन्ति,
सतञ्च धम्मो असतञ्च राजा''ति॥ (अ॰ नि॰ ४.४७; जा॰ २.२१.४१४)।

धम्ममभिञ्ञायाति चतुसच्चधम्मं अभिञ्ञाय अञ्ञाय ञाततीरणपरिञ्ञाहि यथारहं पुब्बभागे जानित्वा। **धम्ममञ्ञाया**ति तमेव धम्मं अपरभागे मग्गञाणेन परिञ्ञादिवसेन यथामरियादं जानित्वा। **पण्डितो**ति पटिवेधबाहुसच्चेन पण्डितो। **रहदोव निवाते चा**ति निवातट्ठाने रहदो विय **अनेजो** किलेसचलनरहितो उपसम्मति, यथा सो रहदो निवातट्ठाने वातेन अनब्भाहतो सन्निसिन्नोव होति, एवं अयम्पि सब्बथापि पटिप्पस्सद्धकिलेसो किलेसचलनरहितो अरहत्तफलसमाधिना वूपसम्मति, सब्बकालं उपसन्तसभावोव होति। **अनेजो**ति सो एवं अनेजादिसभावो अरहा अनेजादिसभावस्स सम्मासम्बुद्धस्स ओकासतो दूरेपि समानो धम्मसभावतो अदूरे सन्तिके एवाति।

ततियसुत्तवण्णना निट्ठिता।

४. अग्गिसुत्तवण्णना

९३. चतुत्थे अनुदहनट्ठेन अग्गि, रागो एव अग्गि रागग्गि। रागो हि उप्पज्जमानो सत्ते अनुदहति झापेति, तस्मा ''अग्गी''ति वुच्चति। इतरेसुपि द्वीसु एसेव नयो। तत्थ यथा अग्गि यदेव इन्धनं निस्साय उप्पज्जति, तं निदहति, महापरिळाहो च होति, एवमिमेपि रागादयो यस्मिं सन्ताने सयं उप्पन्ना, तं निदहन्ति, महापरिळाहा च होन्ति दुन्निब्बापया। तेसु रागपरिळाहेन सन्तत्तहदयानं इच्छितालाभदुक्खेन मरणप्पत्तानं सत्तानं पमाणं नत्थि। अयं ताव रागस्स अनुदहनता। दोसस्स पन अनुदहनताय विसेसतो मनोपदोसिका देवा, मोहस्स अनुदहनताय खिड्डापदोसिका देवा च निदस्सनं। मोहवसेन हि तेसं सतिसम्मोसो होति, तस्मा खिड्डावसेन आहारवेलं अतिवत्तेन्ता कालं करोन्ति। अयं ताव रागादीनं दिट्ठधम्मिको अनुदहनभावो। सम्परायिको पन निरयादीसु निब्बत्तापनवसेन घोरतरो दुरधिवासो च। अयञ्च अत्थो आदित्तपरियायेन विभावेतब्बो।

गाथासु **कामेसु मुच्छिते**ति वत्थुकामेसु पातब्यतावसेन मुच्छं बाल्यं पमादं मिच्छाचारं आपन्ने। **ब्यापन्ने**ति ब्यापन्नचित्ते दहतीति सम्बन्धो। **नरे पाणातिपातिनो**ति इदं दोसग्गिस्स। **अरियधम्मे अकोविदे**ति ये खन्धायतनादीसु सब्बेन सब्बं उग्गहपरिपुच्छाय मनसिकाररहिता अरियधम्मस्स अकुसला, ते सम्मोहेन अभिभूता विसेसेन सम्मूळ्हा

नामाति वुत्ता। **एते अग्गी अजानन्ता**ति ''एते रागग्गिआदयो इध चेव सम्पराये च अनुदहन्ती''ति अजानन्ताआ परिञ्ञाभिसमयवसेन पहानाभिसमयवसेन च अप्पटिविज्झन्ता। **सक्कायाभिरता**ति सक्काये उपादानक्खन्धपञ्चके तण्हादिट्ठिमानननन्दनाभिरता। **वड्ढयन्ती**ति पुनप्पुनं उप्पज्जनेन वड्ढयन्ति आचिनन्ति। **निरय**न्ति अट्ठविधं महानिरयं, सोळसविधं उस्सदनिरयन्ति सब्बम्पि निरयं। **तिरच्छानञ्च योनियो**ति तिरच्छानयोनियो च। **असुर**न्ति असुरकायं पेत्तिविसयञ्च वड्ढयन्तीति सम्बन्धो।

एत्तावता रागग्गिआदीनं इध चेव सम्पराये च अनुदहनभावदस्सनमुखेन वट्टं दस्सेत्वा इदानि नेसं निब्बापनेन विवट्टं दस्सेतुं **''ये च रत्तिन्दिवा''**तिआदि वुत्तं। तत्थ **युत्ता**ति भावनानुयोगवसेन युत्ता। कत्थ? **सम्मासम्बुद्धसासने**। तेन अञ्ञसासने रागग्गिआदीनं निब्बापनाभावं दस्सेति। तथा हि अनञ्ञसाधारणं तेसं निब्बापनविधिं असुभकम्मट्ठानं सङ्खेपेनेव दस्सेन्तो –

''ते निब्बापेन्ति रागग्गिं, निच्चं असुभसञ्ञिनो।
दोसग्गिं पन मेत्ताय, निब्बापेन्ति नरुत्तमा।
मोहग्गिं पन पञ्ञाय, यायं निब्बेधगामिनी''ति॥ –

आह। तत्थ **असुभसञ्ञिनो**ति द्वत्तिंसाकारवसेन चेव उद्धुमातकादिवसेन च असुभभावनानुयोगेन असुभसञ्ञिनो। **मेत्ताया**ति ''सो मेत्तासहगतेन चेतसा एकं दिसं फरित्वा विहरती''ति (अ॰ नि॰ ३.६४, ६६) वुत्ताय मेत्ताभावनाय। एत्थ च असुभज्झानञ्च पादकं कत्वा निब्बत्तितअनागामिमग्गेन रागग्गिदोसग्गीनं निब्बापनं वेदितब्बं। **पञ्ञाया**ति विपस्सनापञ्ञासहिताय मग्गपञ्ञाय। तेनेवाह ''यायं निब्बेधगामिनी''ति। सा हि किलेसक्खन्धं विनिविज्झन्ती गच्छति पवत्ततीति **निब्बेधगामिनी**ति वुच्चति। **असेसं परिनिब्बन्ती**ति अरहत्तमग्गेन असेसं रागग्गिआदिं निब्बापेत्वा सउपादिसेसाय निब्बानधातुया ठिता पञ्ञावेपुल्लप्पत्तिया **निपका** पुब्बेव सम्मप्पधानेन सब्बसो कोसज्जस्स सुप्पहीनत्ता फलसमापत्तिसमापज्जनेन अकिलासुभावेन च **रत्तिन्दिवमतन्दिता** चरिमकचित्तनिरोधेन अनुपादिसेसाय निब्बानधातुया असेसं परिनिब्बन्ति। ततो च **असेसं** निस्सेसं **वट्टदुक्खं अच्चगुं** अतिक्कमंसु।

एवं ये रागग्गिआदिके निब्बापेन्ति, तेसं अनुपादिसेसनिब्बानेन निब्बुतिं दस्सेत्वा इदानि पटिविद्धगुणेहि थोमेन्तो ओसानगाथमाह। तत्थ **अरियद्दसा**ति अरियेहि बुद्धादीहि पस्सितब्बं किलेसेहि वा आरकत्ता अरियं निब्बानं, अरियं चतुसच्चमेव वा दिट्ठवन्तोति अरियद्दसा। वेदस्स मग्गञाणस्स, तेन वा वेदेन संसारस्स परियोसानं गताति **वेदगुनो। सम्मदञ्ञाया**ति सम्मदेव सब्बं आजानितब्बं कुसलादिं खन्धादिञ्च जानित्वा। सेसं वुत्तनयमेव।

चतुत्थसुत्तवण्णना निट्ठिता।

५. उपपरिक्खसुत्तवण्णना

९४. पञ्चमे **तथा तथा**ति तेन तेन पकारेन। **उपपरिक्खेय्या**ति वीमंसेय्य परितुलेय्य सम्मसेय्य वा। **यथा यथास्स उपपरिक्खतो**ति यथा यथा अस्स भिक्खुनो उपपरिक्खन्तस्स। **बहिद्धा चस्स विञ्ञाणं अविक्खित्तं अविसट**न्ति बहिद्धा रूपादिआरम्मणे उप्पज्जनकविक्खेपाभावतो अविक्खित्तं समाहितं, ततो एव अविसटं सिया। इदं वुत्तं होति – भिक्खवे, येन येन पकारेन इमस्स आरद्धविपस्सकस्स भिक्खुनो उपपरिक्खतो सङ्खारे सम्मसन्तस्स पुब्बे

समाहिताकारसल्लक्खणवसेन समथनिमित्तं गहेत्वा सक्कच्चं निरन्तरं सम्मसनञाणं पवत्तेन्तस्स अत्तनो विपस्सनाचित्तं कम्मट्ठानतो बहिद्धा रूपादिआरम्मणे उप्पज्जनकं न सिया, अच्चारद्धवीरियताय उद्धच्चपक्खियं न सिया, तेन तेन पकारेन भिक्खु उपपरिक्खेय्य परितुलेय्याति। **अज्झत्तं असण्ठित**न्ति यस्मा वीरिये मन्दं वहन्ते समाधिस्स बलवभावतो कोसज्जाभिभवेन अज्झत्तं गोचरज्झत्तसङ्खाते कम्मट्ठानारम्मणे सङ्कोचवसेन ठितत्ता सण्ठितं नाम होति, वीरियसमताय पन योजिताय असण्ठितं होति वीथिं पटिपन्नं। तस्मा यथा यथास्स उपपरिक्खतो विञ्ञाणं अज्झत्तं असण्ठितं अस्स, वीथिपटिपन्नं सिया, तथा तथा उपपरिक्खेय्य। **अनुपादाय न परितस्सेय्या**ति यथा यथास्स उपपरिक्खतो ''एतं मम, एसो मे अत्ता''ति तण्हादिट्ठिग्गाहवसेन रूपादीसु किञ्चि सङ्खारं अग्गहेत्वा ततो एव तण्हादिट्ठिग्गाहवसेन न परितस्सेय्य, तथा तथा उपपरिक्खेय्याति सम्बन्धो। कथं पन उपपरिक्खतो तिविधम्पेतं सियाति? उद्धच्चपक्खिये कोसज्जपक्खिये च धम्मे वज्जेन्तो वीरियसमतं योजेत्वा पुब्बेव विपस्सनुपक्किलेसेहि चित्तं विसोधेत्वा यथा सम्मदेव विपस्सनाञाणं विपस्सनावीथिं पटिपज्जति, तथा सम्मसतो।

इति भगवा चतुसच्चकम्मट्ठानिकस्स भिक्खुनो अनुक्कमेन पटिपदाञाणदस्सनविसुद्धिया आरद्धाय अच्चारद्धवीरियअतिसिथिलवीरियविपस्सनुपक्किलेसेहि चित्तस्स विसोधनूपायं दस्सेत्वा इदानि तथा विसोधिते विपस्सनाञाणे न चिरस्सेव विपस्सनं मग्गेन घटेत्वा सकलवट्टदुक्खसमतिक्कमाय संवत्तन्तीति दस्सेन्तो **''बहिद्धा, भिक्खवे, विञ्ञाणे''**तिआदिमाह, तं वुत्तनयमेव। यं पन वुत्तं – **''आयतिं जातिजरामरणदुक्खसमुदयसम्भवो न होती''**ति, तस्सत्थो – एवं विपस्सनं मग्गेन घटेत्वा मग्गपटिपाटिया अग्गमग्गेन अनवसेसतो किलेसेसु खीणेसु आयतिं अनागते जातिजरामरणसकलवट्टदुक्खसमुदयसङ्खातो सम्भवो उप्पादो च न होति, जातिसङ्खातो वा दुक्खसमुदयो जरामरणसङ्खातो दुक्खसम्भवो च न होति।

गाथायं **सत्तसङ्गप्पहीनस्सा**ति तण्हासङ्गो, दिट्ठिसङ्गो, मानसङ्गो, कोधसङ्गो, अविज्जासङ्गो, किलेससङ्गो, दुच्चरितसङ्गोति इमेसं सत्तन्नं सङ्गानं पहीनत्ता सत्तसङ्गप्पहीनस्स। केचि पन ''सत्तानुसया एव सत्त सङ्गा''ति वदन्ति। **नेत्तिच्छिन्नस्सा**ति छिन्नभवनेत्तिकस्स। **विक्खीणो जातिसंसारो**ति पुनप्पुनं जायनवसेन पवत्तिया जातिहेतुकत्ता च जातिभूतो संसारोति जातिसंसारो, सो भवनेत्तिया छिन्नत्ता विक्खीणो परिक्खीणो, ततो एव **नत्थि तस्स पुनब्भवो**ति।

पञ्चमसुत्तवण्णना निट्ठिता।

६. कामूपपत्तिसुत्तवण्णना

९५. छट्ठे **कामूपपत्तियो**ति कामपटिलाभा कामपटिसेवना वा। **पच्चुपट्ठितकामा**ति निबद्धकामा निबद्धारम्मणा यथा तं मनुस्सा। मनुस्सा हि निबद्धवत्थुस्मिं वसं वत्तेन्ति। यत्थ पटिबद्धचित्ता होन्ति, सतम्पि सहस्सम्पि दत्वा तमेव मातुगामं आनेत्वा निबद्धभोगं भुञ्जन्ति। एकच्चे च देवा। चातुमहाराजिकतो पट्ठाय हि चतुदेवलोकवासिनो निबद्धवत्थुस्मिंयेव वसं वत्तेन्ति। पञ्चसिखवत्थु चेत्थ निदस्सनं। तथा एकच्चे आपायिके नेरयिके ठपेत्वा सेसअपायसत्तापि निबद्धवत्थुस्मिंयेव वसं वत्तेन्ति। मच्छा हि अत्तनो मच्छिया, कच्छपो कच्छपियाति एवं सब्बेपि तिरच्छाना पेता विनिपातिका च। तस्मा नेरयिके ठपेत्वा सेसअपायसत्ते उपादाय याव तुसितकाया इमे सत्ता पच्चुपट्ठितकामा नाम, **निम्मानरतिनो**ति सयं निम्मिते निम्माने रति एतेसन्ति निम्मानरतिनो। ते हि नीलपीतादिवसेन यादिसं यादिसं रूपं इच्छन्ति, तादिसं तादिसं निम्मिनित्वा रमन्ति आयस्मतो अनुरुद्धस्स पुरतो मनापकायिका देवता विय। **परनिम्मितवसवत्तिनो**ति परेहि निम्मिते कामे वसं वत्तेन्तीति परनिम्मितवसवत्तिनो। तेसञ्हि मनं ञत्वा परे यथारुचितं कामभोगं निम्मिनन्ति, ते तत्थ वसं वत्तेन्ति। कथं ते

परस्स मनं जानन्तीति? पकतिसेवनावसेन। यथा हि कुसलो सूदो रञ्ञो भुञ्जन्तस्स यं यं रुच्चति, तं तं जानाति, एवं पकतिया अभिरुचितारम्मणं ञत्वा तादिसेयेव निम्मिनन्ति, ते तत्थ वसं वत्तेन्ति, मेथुनसेवनादिवसेन कामे परिभुञ्जन्ति। केचि पन ''हसितमत्तेन ओलोकितमत्तेन आलिङ्गितमत्तेन हत्थग्गहणमत्तेन च तेसं कामकिच्चं इज्झती''ति वदन्ति, तं अट्ठकथायं ''एतं पन नत्थी''ति पटिक्खित्तं। न हि कायेन अफुसन्तस्स फोट्ठब्बं कामकिच्चं साधेति। छन्नम्पि कामावचरदेवानं कामा पाकतिका एव। वुत्तञ्हेतं –

''छ एते कामावचरा, सब्बकामसमिद्धिनो।
सब्बेसं एकसङ्खातं, आयु भवति कित्तक''न्ति॥ (विभ० १०२३)।

गाथासु **ये चञ्ञे**ति ये यथावुत्तदेवेहि अञ्ञे च कामभोगिनो मनुस्सा चेव एकच्चे अपायूपगा च सब्बे ते। **इत्थभावञ्ञथाभाव**न्ति इमं यथापटिलद्धत्तभावञ्चेव, उपपत्तिभवन्तरसङ्खातं इतो अञ्ञथाभावञ्चाति द्विप्पभेदं संसारं **नातिवत्तरे** न अतिक्कमन्ति। **सब्बे परिच्चजे कामे**ति दिब्बादिभेदे सब्बेपि कामे वत्थुकामे च किलेसकामे च परिच्चजेय्य। किलेसकामे अनागामिमग्गेन पजहन्तोयेव हि वत्थुकामे परिच्चजति नाम। **पियरूपसातगधित**न्ति पियरूपेसु रूपादीसु सुखवेदनस्सादेन गधितं गिद्धं। **छेत्वा सोतं दुरच्चय**न्ति अञ्ञेहि दुरच्चयं दुरतिक्कमं तण्हासोतं अरहत्तमग्गेन समुच्छिन्दित्वा। सेसं हेट्ठा वुत्तनयमेवाति।

छट्ठसुत्तवण्णना निट्ठिता।

७. कामयोगसुत्तवण्णना

९६. सत्तमे **कामयोगयुत्तो**ति पञ्चकामगुणिको रागो कामयोगो, तेन युत्तो कामयोगयुत्तो, असमुच्छिन्नकामरागस्सेतं अधिवचनं। रूपारूपभवेसु छन्दरागो भवयोगो, तथा झाननिकन्ति सस्सतदिट्ठिसहगतो च रागो, तेन युत्तो **भवयोगयुत्तो,** अप्पहीनभवरागोति अत्थो। **आगामी**ति ब्रह्मलोके ठितोपि पटिसन्धिग्गहणवसेन इमं मनुस्सलोकं आगमनसीलो। तेनेवाह **''आगन्ता इत्थत्त''**न्ति। मनुस्सत्तभावसङ्खातं इत्थभावं आगमनधम्मो, मनुस्सेसु उपपज्जनसीलोति अत्थो। कामञ्चेत्थ कामयोगो इत्थत्तं आगमनस्स कारणं। यो पन कामयोगयुत्तो, सो एकन्तेन भवयोगयुत्तोपि होतीति दस्सनत्थं ''कामयोगयुत्तो, भिक्खवे, भवयोगयुत्तो''ति उभयम्पि एकज्झं कत्वा वुत्तं।

कामयोगविसंयुत्तोति एत्थ असुभज्झानम्पि कामयोगविसंयोगो, तं पादकं कत्वा अधिगतो अनागामिमग्गो एकन्तेनेव कामयोगविसंयोगो नाम, तस्मा ततियमग्गफले ठितो अरियपुग्गलो ''कामयोगविसंयुत्तो''ति वुत्तो। यस्मा पन रूपारूपभवेसु छन्दरागो अनागामिमग्गेन न पहीयति, तस्मा सो अप्पहीनभवयोगत्ता ''भवयोगयुत्तो''ति वुत्तो। **अनागामी**ति कामलोकं पटिसन्धिग्गहणवसेन अनागमनतो अनागामी। कामयोगविसंयोगवसेनेव हि सद्धिं अनवसेसओरम्भागियसंयोजनसमुग्घातेन अज्झत्तसंयोजनाभावसिद्धितो इत्थत्तं अनागन्त्वा होति, तत्थ परिनिब्बायी अनावत्तिधम्मो। यस्स पन अनवसेसं भवयोगो पहीनो, तस्स अविज्जायोगादिअवसिट्ठकिलेसापि तदेकट्ठभावतो पहीना एव होन्तीति, सो परिक्खीणभवसंयोजनो ''अरहं खीणासवो''ति वुच्चति। तेन वुत्तं ''कामयोगविसंयुत्तो, भिक्खवे, भवयोगविसंयुत्तो अरहं होति खीणासवो''ति। एत्थ च कामयोगविसंयोगो अनागामी चतुत्थज्झानस्स सुखदुक्खसोमनस्सदोमनस्सप्पहानं विय, ततियमग्गस्स दिट्ठिविचिकिच्छासीलब्बतपरामाससंयोजनपरिक्खयो विय च चतुत्थमग्गस्स वण्णभणनत्थं वुत्तोति दट्ठब्बं। पठमपदेन सोतापन्नसकदागामीहि सद्धिं सब्बो पुथुज्जनो गहितो, दुतियपदेन

पन सब्बो अनागामी, ततियपदेन अरहाति अरहत्तनिकूटेन देसनं निट्ठापेसि।

गाथासु **उभय**न्ति उभयेन, कामयोगेन, भवयोगेन च संयुत्ताति अत्थो। **सत्ता गच्छन्ति संसार**न्ति पुथुज्जना सोतापन्ना सकदागामिनोति इमे तिविधा सत्ता कामयोगभवयोगानं अप्पहीनत्ता गच्छन्ति संसारन्ति। ततो एव जातिमरणगामिनो होन्ति। एत्थ एकबीजी, कोलंकोलो, सत्तक्खत्तुपरमोति तीसु सोतापन्नेसु सब्बमुदु सत्तक्खत्तुपरमो, सो अट्ठमं भवं न निब्बत्तेति, अत्तनो परिच्छिन्नजातिवसेन पन संसरति, तथा इतरेपि। सकदागामीसुपि यो इध सकदागामिमग्गं पत्वा देवलोके उप्पज्जित्वा पुन इध निब्बत्तति, सो अत्तनो परिच्छिन्नजातिवसेनेव संसरति। ये पन सकदागामिनो वोमिस्सकनयेन विना तत्थ तत्थ देवेसुयेव मनुस्सेसुयेव वा निब्बत्तन्ति, ते उपरिमग्गाधिगमाय याव इन्द्रियपरिपाका पुनप्पुनं उप्पज्जनतो संसरन्तियेव। पुथुज्जने पन वत्तब्बमेव नत्थि सब्बभवसंयोजनानं अपरिक्खीणत्ता। तेन वुत्तं –

''कामयोगेन संयुत्ता, भवयोगेन चूभयं।
सत्ता गच्छन्ति संसारं, जातिमरणगामिनो''ति॥

कामे पहन्त्वानाति कामरागसङ्खाते किलेसकामे अनागामिमग्गेन पजहित्वा। **छिन्नसंसया**ति समुच्छिन्नकङ्खा, तञ्च खो सोतापत्तिमग्गेनेव। वण्णभणनत्थं पन चतुत्थमग्गस्स एवं वुत्तं। अरहन्तो हि इध ''छिन्नसंसया''ति अधिप्पेता। तेनेवाह **''खीणमानपुनब्भवा''**ति। सब्बसो खीणो नवविधोपि मानो आयतिं पुनब्भवो च एतेसन्ति खीणमानपुनब्भवा। मानग्गहणेन चेत्थ तदेकट्ठताय लक्खणवसेन वा सब्बो चतुत्थमग्गवज्झो किलेसो गहितोति। खीणमानताय च सउपादिसेसा निब्बानधातु वुत्ता होति, खीणपुनब्भवताय अनुपादिसेसा। सेसं सुविञ्ञेय्यमेव।

सत्तमसुत्तवण्णना निट्ठिता।

८. कल्याणसीलसुत्तवण्णना

९७. अट्ठमे **कल्याणसीलो**ति सुन्दरसीलो, पसत्थसीलो, परिपुण्णसीलो। तत्थ सीलपारिपूरी द्वीहि कारणेहि होति सम्मदेव सीलविपत्तिया आदीनवदस्सनेन, सीलसम्पत्तिया च आनिसंसदस्सनेन। इध पन सब्बपरिबन्धविप्पमुत्तस्स सब्बाकारपरिपुण्णस्स मग्गसीलस्स फलसीलस्स च वसेन कल्याणता वेदितब्बा। **कल्याणधम्मो**ति सब्बे बोधिपक्खियधम्मा अधिप्पेता, तस्मा कल्याणा सतिपट्ठानादिबोधिपक्खियधम्मा एतस्साति कल्याणधम्मो। **कल्याणपञ्ञो**ति च मग्गफलपञ्ञावसेनेव कल्याणपञ्ञो। लोकुत्तरा एव हि सीलादिधम्मा एकन्तकल्याणा नाम अकुप्पसभावत्ता। केचि पन ''चतुपारिसुद्धिसीलवसेन कल्याणसीलो, विपस्सनामग्गधम्मवसेन कल्याणधम्मो, मग्गफलपञ्ञावसेन कल्याणपञ्ञो''ति वदन्ति। असेक्खा एव ते सीलधम्मपञ्ञाति एके। अपरे पन भणन्ति – सोतापन्नसकदागामीनं मग्गफलसीलं कल्याणसीलं नाम, तस्मा ''कल्याणसीलो''ति इमिना सोतापन्नो सकदागामी च गहिता होन्ति। ते हि सीलेसु परिपूरकारिनो नाम। अनागामिमग्गफलधम्मा अग्गमग्गधम्मा च कल्याणधम्मा नाम। तत्थ हि बोधिपक्खियधम्मा भावनापारिपूरिं गच्छन्ति। तस्मा ''कल्याणधम्मो''ति इमिना ततियमग्गट्ठतो पट्ठाय तयो अरिया गहिता होन्ति। पञ्ञाकिच्चस्स मत्थकप्पत्तिया अग्गफले पञ्ञा कल्याणपञ्ञा नाम, तस्मा पञ्ञावेपुल्लप्पत्तो अरहा ''कल्याणपञ्ञो''ति वुत्तो। एवमेव पुग्गला गहिता होन्तीति। किं इमिना पपञ्चेन? अग्गमग्गफलधम्मा इध कल्याणसीलादयो वुत्ताति अयमम्हाकं खन्ति। धम्मविभागेन हि अयं पुग्गलविभागो, न धम्मविभागोति।

केवलीति एत्थ केवलं वुच्चति केनचि अवोमिस्सकताय सब्बसङ्खतविवित्तं निब्बानं, तस्स अधिगतत्ता अरहा केवली। अथ वा पहानभावनापारिपूरिया परियोसानअनवज्जधम्मपारिपूरिया च कल्याणकट्ठेन अब्यासेकसुखताय च केवलं अरहत्तं, तदधिगमेन केवली खीणासवो। मग्गब्रह्मचरियवासं वसित्वा परियोसापेत्वा ठितोति **वुसितवा**। उत्तमेहि अग्गभूतेहि वा असेक्खधम्मेहि समन्नागतत्ता **''उत्तमपुरिसो''**ति वुच्चति।

सीलवाति एत्थ केनट्ठेन सीलं? सीलनट्ठेन सीलं। किमिदं सीलनं नाम? समाधानं, सुसील्यवसेन कायकम्मादीनं अविप्पकिण्णताति अत्थो। अथ वा उपधारणं, झानादिकुसलधम्मानं पतिट्ठानवसेन आधारभावोति अत्थो। तस्मा सीलति, सीलेतीति वा सीलं। अयं ताव सद्दलक्खणनयेन सीलट्ठो। अपरे पन ''सिरट्ठो सीलट्ठो, सीतलट्ठो सीलट्ठो, सिवट्ठो सीलट्ठो''ति निरुत्तिनयेन अत्थं वण्णयन्ति। तयिदं पारिपूरितो अतिसयतो वा सीलं अस्स अत्थीति **सीलवा,** चतुपारिसुद्धिसीलवसेन सीलसम्पन्नोति अत्थो। तत्थ यं जेट्ठकसीलं, तं वित्थारेत्वा दस्सेतुं **''पातिमोक्खसंवरसंवुतो''**तिआदि वुत्तन्ति एकच्चानं आचरियानं अधिप्पायो।

अपरेन पन भणन्ति – उभयत्थापि पातिमोक्खसंवरो भगवता वुत्तो। पातिमोक्खसंवरो एव हि सीलं, इतरेसु इन्द्रियसंवरो छद्वाररक्खणमत्तमेव, आजीवपारिसुद्धि धम्मेन पच्चयुप्पादनमत्तमेव, पच्चयसन्निस्सितं पटिलद्धपच्चये ''इदमत्थ''न्ति पच्चवेक्खित्वा परिभुञ्जनमत्तमेव। निप्परियायेन पातिमोक्खसंवरोव सीलं। यस्स सो भिन्नो, सो सीसच्छिन्नो पुरिसो विय हत्थपादे ''सेसानि रक्खिस्सती''ति न वत्तब्बो। यस्स पन सो अरोगो, अच्छिन्नसीसो विय पुरिसो, तानि पुन पाकतिकानि कत्वा रक्खितुं सक्कोति। तस्मा **सीलवा**ति इमिना पातिमोक्खसीलमेव उद्दिसित्वा तं वित्थारेतुं **''पातिमोक्खसंवरसंवुतो''**तिआदि वुत्तन्ति।

तत्थ **पातिमोक्ख**न्ति सिक्खापदसीलं। तञ्हि यो नं पाति रक्खति, तं मोक्खेति मोचेति आपायिकादीहि दुक्खेहीति पातिमोक्खं। संवरणं संवरो, कायवाचाहि अवीतिक्कमो। पातिमोक्खमेव संवरो पातिमोक्खसंवरो, तेन संवुतो पिहितकायवाचोति **पातिमोक्खसंवरसंवुतो**। इदमस्स तस्मिं सीले पतिट्ठितभावपरिदीपनं। **विहरती**ति तदनुरूपविहारसमङ्गिभावपरिदीपनं। **आचारगोचरसम्पन्नो**ति हेट्ठा पातिमोक्खसंवरस्स, उपरि विसेसानुयोगस्स च उपकारकधम्मपरिदीपनं। **अणुमत्तेसु वज्जेसु भयदस्सावी**ति पातिमोक्खसीलतो अचवनधम्मतापरिदीपनं। **समादाया**ति सिक्खापदानं अनवसेसतो आदानपरिदीपनं। **सिक्खती**ति सिक्खाय समङ्गिभावपरिदीपनं। **सिक्खापदेसू**ति सिक्खितब्बधम्मपरिदीपनं।

